भीगा है और तुम्हारा कबरी क्यों गीली है, हे भीरु! तुम आकाश मार्ग से कहाँ जाती हो ॥ ८ ॥ हे भद्रे! किस पुण्य से यह तुम्हारा अति तेजस्वी शरीर और अद्वितीय मनोहर रूप है ॥ ९ ॥ हे सुलोचने! मेरे मस्तक पर तुम्हारे वस्त्र से गिरे हुए एक बूँद जल से मेरा मन जो सर्वदा क्रूर रहता था क्षण भर में शान्त हो गया ॥ १० ॥ इस जल की

क्या महिमा है तुम कह सकती हो, तुम मुझको शीलवती जान पड़ती हो, तुम्हारी आकृति बिना गण की न होगी ॥ ११ ॥ अप्सरा ने कहा—हे राक्षस ! सुनो मैं कामरूपिणी अप्सरा हूँ, मेरा नाम कांचन मालिनी है, मैं प्रयाग से आती हूँ ॥ १२ ॥ गङ्गा यमुना के संगम में भली भाँति स्नान करने से मेरे वस्त्र भींगे है, हे राक्षस ! मैं उत्तम पर्वत कैलास पर जा रही हूँ ॥ १३ ॥ वहाँ पर देवता तथा दैत्यों के नमस्कार किये जाने वाले पार्वतीपति रहते हैं, त्रिवेणी

नाकृतिर्निर्गुणा भवेत ॥ ११ ॥ अप्सरा उवाच ॥ श्रूयतामप्सराश्चाहं भो रक्षः कामरूपिणी ॥ प्रयागतो ह्यागताऽहं नाम्ना काञ्चनमालिनी ॥१२॥ आर्द्रं च परिधानं मे सुस्नाताऽहं सिता-सिते ॥ गन्तव्यश्च मया रक्षः कैलासः पर्वतोत्तमः ॥ १३ ॥ तत्राऽऽस्ते पार्वतीनाथः सुरा-सुरनमस्कृतः ॥ वेणीवारिप्रभावेण रक्षस्ते क्रूरता गता ॥१४॥ जाताऽहं येन पुण्येन गन्धर्वस्य सुमेधसः ॥ पुत्री च संगता रक्षः उमायाश्च प्रिया सखी ॥१५॥ एतदुक्तं मया रक्षः कथ्यतेऽत्र पुराभवः ॥ अत्याश्चर्यकरं वृत्तं शृणुष्वाऽवहितो मम ॥१६॥ कलिङ्गाधिपतेः राज्ञः अहमासं

के जल से हे राक्षस ! तेरी क्रूरता निकल गई ॥ १४ ॥ जिस पुण्य के प्रभाव से मैं सुबुद्धि गन्धर्व की कन्या उत्पन्न हुई तथा हे राक्षस ! उमा की प्रिय सखी हुई ॥ १५ ॥ वह हे राक्षस ! ब्रह्माजी ने मुझसे कहा था, वह मेरा आश्चर्य करनेवाला वृत्तान्त सुनो ॥ १६ ॥ मैं कलिंग देश के राजा को वेश्या थी

रूप तथा लावण्य से सम्पन्न, सौभाग्य तथा मद से गर्वित ॥ १७ ॥ अन्य युवतियों में से उस पुर शिरोमणि थी, हे राक्षस ! उस जन्म में मैंने इच्छा पूर्वक भोग भोगा ॥ १८ ॥ मेरी यौवन (रूपी) संपत्ति से वह संम्पूर्ण नगर मोहित था, अमूल्य वस्त्र, आभूषण तथा धन ॥ १९ ॥ नाना प्रकार के पोशाग, कपूर, अगरु, चन्दन मैंने अपनी मोहनी रूप से

विलासिनी ॥ रूपलावण्यसम्पन्ना सौभाग्यमदगर्विता ॥१७॥ अन्यासां युवतीनां च तत्पुरेऽहं शिरोमणिः ॥ तज्जन्मनि मया रक्षो भुक्त्वा भोगान्यथेच्छया ॥१८॥ मोहितं तत्पुरं सर्वं मया यौवनसम्पदा ॥ अमूल्यानि च वस्त्राणि भूषणानि धनानि च ॥१९॥ वासांसि च विचित्राणि कर्पूरागुरुचन्दनम् ॥ एतच्चोपार्जितं सर्वं मया मोहनरूपया ॥ २० ॥ नाहं जानामि हेम्नोऽन्तं स्वनिवासे निशाचर ॥ संसेवन्ते युवानो मे चरणौ कामपीडिताः ॥ २१ ॥ मया ते वञ्चिताः सर्वे सर्वस्वेन तु मायया ॥ अन्योऽन्यं सेर्ष्यभावेन मृताः केचित्तु कामिनः ॥२२॥ इत्थं तन्नगरे रम्ये स कालो मे गतस्तदा ॥ प्राप्ते तु वार्धके काले शुशोच हृदयं मम ॥२३॥ न दत्तं न हुतं

प्राप्त किये ॥ २० ॥ हे राक्षस ! मैंने अपने निवास स्थान में सुवर्ण का अन्त न जाना, कामपीड़ित युवा पुरुष मेरे चरणों की सेवा करते थे ॥ २१ ॥ मैंने इन सबका सर्वस्व हरण कर लिया, कोई कोई कामी लोग आपस में स्पर्धा करके मृत्यु को प्राप्त हो गये ॥ २२ ॥ इस प्रकार उस रमणीक नगर में मेरा समय बीता, वृद्धावस्था प्राप्त होने पर मैंने अपने मन में विचार किया ॥ २३ ॥ कि मैंने न तो दान किया, न तप किया और न चतुर्वर्ग के

फल देने वाले महादेवजी की मैंने आराधना किया ॥ २४ ॥ न मैंने दुर्गति हरने वाली दुर्गा देवी की पूजा किया और न भोग में लुब्ध होकर मैंने सब पापों को हरने वाले विष्णु भगवान् की आराधना किया ॥ २५ ॥ न तो ब्राह्मणों को तृप्त किया; न तो प्राणियों का हित किया, प्रमाद के कारण मैंने किंचित् मात्र भी पुण्य न किया ॥ २६ ॥ मैंने बहुतेरे पाप

तप्तं न व्रतं चरितं मया ॥ नाराधितो महादेवश्चतुर्वर्गफलप्रदः ॥ २४ ॥ न मया पूजिता देवी दुर्गा दुर्गार्तिहारिणी ॥ सर्वपापहरो विष्णुर्न स्मृतो भोगलुब्धया ॥ २५ ॥ न च सन्तर्पिता विप्रा न कृतं प्राणिनां हितम् ॥ अणुमात्रं मया पुण्यं न कृतं च प्रमादतः ॥२६॥ पातकं च कृतं भूरि तेन मे दह्यते मनः ॥ बहुधैव विलप्याऽहं ब्राह्मणं शरणं गता ॥२७॥ ब्रह्मज्ञं वेदविद्वांसं तस्य राज्ञः पुरोधसम् ॥ स हि पृष्टो मया रक्षः कथं मे निष्कृतिर्भवेत् ॥२८॥ पापस्यास्य द्विजश्रेष्ठ कथं यास्यामि सद्गतिम् ॥ स्वेनैव कर्मणा तप्तां वराकीं दीनमानसाम् ॥२९॥

किये इसी से मेरा मन दहकता है, इस प्रकार बहुत सा विलाप करके मैं ब्राह्मणों की शरण में गई ॥ २७ ॥ वह ब्राह्मण ब्रह्मज्ञ, वेद निपुण तथा राजा का पुरोहित था तथा, हे राक्षस ! उस ब्राह्मण से मैंने पूछा कि मेरा निस्तार किस प्रकार से होगा ॥२८॥ हे विप्रवर ! कहिये मेरी सद्गति किस प्रकार होगी, अपने ही कर्म से तपी हुई मुझ दीन चित्तवाली विचारी ॥ २९ ॥ पाप (रूपी) कीचड़ में डूबी हुई मुझको झोंटा पकड़ कर उबारिये, हे ब्राह्मण ! हर्ष की दृष्टि से मुझ पर दया के जल

की वर्षा कीजिये ॥ ३० ॥ साधु सज्जन भले बुरे सभी पर दया करते हैं, क्षीर सागर हंस को दूध देता है क्या बत्तक को नहीं देता ? ॥ ३१ ॥ इस प्रकार मेरे वचन को सुनकर उन्होंने मुझ पर दया किया, और उस ब्राह्मण ने प्रीति पूर्वक सब धर्मों से पूर्ण वाक्य मुझसे कहा ॥ ३२ ॥ ब्राह्मण ने कहा—हे सुमुखि ! मैं तेरे सब निषिद्ध आचरणों को

पापपङ्कनिमग्नां त्वं मामुद्धर कचग्रहैः ॥ मयि कारुण्यजं वारिवर्षं हर्षदृशा द्विजः ॥ ३० ॥ सज्जने साधवः सर्वे साधुः साधुरसज्जने ॥ क्षीरार्णवः पयोदाता हंसाय न बकाय किम् ॥३१॥ इत्यसौ मद्वचः श्रुत्वा चकारानुग्रहं मयि ॥ ऊचे प्रीतिकरं वाक्यं सर्वधर्ममयं द्विजः ॥ ३२ ॥ द्विज उवाच ॥ निषिद्धाचरणं जाने सर्वं तेऽहं वरानने ॥ कुरु मे सत्वरं वाक्यं याहि क्षेत्रं प्रजापतेः ॥३३॥ तत्र गत्वा कुरु स्नानं तेन पापक्षयस्तव ॥ नाहमन्यत् प्रपश्यामि यत्ते पाप-प्रणाशनम् ॥३४॥ प्रायश्चित्तं परं तीर्थं स्मृतं नान्यन्महर्षिभिः ॥ किन्तु तीर्थे त्यजेद्भीरु मन-साऽप्यशिवां क्रियाम् ॥ ३५ ॥ प्रयागस्नानशुद्धा त्वं स्वर्गं यास्यति निश्चितम् ॥ प्रयागस्नान-

जानता हूँ, तू मेरी बात मान, शीघ्र ही प्रजापति के स्थान में जा ॥ ३३ ॥ वहाँ पर जाकर स्नान कर, इससे तेरे पाप नष्ट होंगे, तेरे पापों को नाश होने की और कोई विधि मैं नहीं देखता ॥ ३४ ॥ महर्षियों ने तीर्थ स्नान करने के सिवाय दूसरा कोई प्रायश्चित नहीं कहा है, परन्तु हे भीरु ! तीर्थ में मन से भी अशुभ क्रिया मत करना ॥ ३५ ॥

प्रयाग में स्नान करने से शुद्ध होकर तू अवश्य स्वर्ग म जायगा, इसमें कुछ भी सन्देह नहीं है कि प्रयाग में स्नान मात्र से मनुष्य स्वर्ग में जाता है ॥ ३६ ॥ हे भामिनी ! दूसरे देश में किये हुए पाप उसी क्षण प्रयाग में नाश होते हैं बिना तीर्थ में स्नान किये हुए पाप नष्ट नहीं होते ॥ ३७ ॥ हे भीरु ! सुनु, प्राचीन समय में गौतम मुनि की स्त्री को देखकर

मात्रेण नृणां नाको न संशयः ॥३६॥ अन्यदेशकृतं पापं तत्क्षणादेव भामिनि ॥ प्रयागे विलयं याति पापं तीर्थकृतं विना ॥ ३७ ॥ शृणु भीरु पुरा शक्रो गौतमस्य मुनेर्वधूम् ॥ दृष्ट्वा कामवशप्राप्तस्तां गतो गुप्तकामुकः ॥३८॥ तेनैवोग्रेण पापेन तदैव जनितं फलम् ॥ ऋषिस्त्रीगन्तुरिन्द्रस्य तस्याश्च पुरतस्तदा ॥३९॥ कुरूप गर्हित जातं अतिलज्जाकर वपुः ॥ तद्भर्तुः शापमाहात्म्यात् सहस्रभागचिह्नितम् ॥४०॥ अधोमुखस्तदा भूत्वा देवराजो विनिर्गतः ॥ विनिन्दन् स्वकृतं कर्म सोऽभिभूतस्तु लज्जया ॥ ४१ ॥ मेरोः शिरसि तोयाढ्ये शतयोजनविस्तरे ॥ तत्र गत्वा प्रवि-

इन्द्र काम वश हुआ, तब अपने काम को छिपाते हुए उसके पास गया ॥ ३८ ॥ इस बड़े पाप का उसको उसी क्षण फल मिला, ऋषी की स्त्री के समीप जाने से इन्द्र का ॥ ३९ ॥ शरीर अति लज्जायुक्त, निन्दित और कुरुप हो गया, उसके पति के शाप की महिमा से इन्द्र के शरीर में हजारों भग के चिह्न हो गये ॥ ४० ॥ तब मुँह नीचा करके देवराज इन्द्र चला गया, लज्जा से युक्त होकर अपने कर्म की निन्दा करने लगा ॥ ४१ ॥ मेरु पर्वत के शिखर पर सौ योजन

लम्बा एक सुन्दर जल से परिपूर्ण सरोवर था वहाँ जाकर वह सुवर्ण कमल से परिपूर्ण कोटर में घुस गया ॥ ४२ ॥ वहाँ बैठकर अपनी तथा कामदेव को निन्दा करने लगा; तत्काल पाप देने वाली कामता को धिक्कार है ॥ ४३ ॥ इसी के पाप से निन्दित होकर सब लोग नरक में जाते हैं। आयुष्य, कीर्ति, धर्म, यश तथा धैर्य को सर्वदा नाश करने करने वाले ॥ ४४ ॥ दुराचारी कामदेव को धिक्कार; यह आपत्ति का नियत स्थान है देह में स्थित, दुःख से दमन करने

ष्टस्तु हेमाम्भोरुहकोटरे ॥ ४२ ॥ तत्रस्थो गर्हयन्नित्यमात्मानं मन्मथं तथा ॥ धिक्तां सकामतां लोके सद्यः पातकदायिनीम् ॥ ४३ ॥ पापेन नरकं याति सर्वलोकविगर्हितः ॥ आयुःकीर्तिर्यशोधर्मधैर्यध्वंसकरं सदा ॥ ४४ ॥ धिङ्मन्मथं दुराचारमापदां नियतं पदम् ॥ देहस्थं दुर्दमं शत्रुमसन्तुष्टं सदाऽशिवम् ॥४५॥ इत्थं वादिनि प्रच्छन्ने वासवे पद्मवासिनि ॥ आखण्डलं विना भीरु देवलोको न शोभते ॥ ४६ ॥ तदा देवाः सगन्धर्वा लोकपालाः सकिन्नराः ॥ शच्या सह समागत्य पप्रच्छुस्ते बृहस्पतिम् ॥४७॥ भगवन् बलभिद्देवो नैव जानीमहे वयम् ॥

योग्य, शत्रु, असन्तुष्ट तथा सर्वदा अकल्याण करने वाला ॥ ४५ ॥ पद्म से छिये हुए स्थान में इन्द्र इस प्रकार कह रहे थे; हे भीरु ! इन्द्र के बिना देवलोक की शोभा नहीं होती ॥ ४६ ॥ तब देवता, गन्धर्व, किन्नर, लोकपाल इन्द्राणी (शची) के साथ जाकर बृहस्पति से पूछने लगे ॥ ४७ ॥ हे भगवान् ! हम लोगों को नहीं मालूम कि इन्द्र

कहाँ गये, हम लोग उनको कहाँ खोजें ॥ ४८ ॥ देवगण से युक्त उनके बिना स्वर्ग वैसे ही शोभा नहीं देता जैसे श्रेष्ठ कुल पुत्र के बिना नहीं सोभता ॥ ४९ ॥ ऐसा उपाय विचारिये जिससे स्वर्गलोक सुशोभित होवे और क्रिया युक्त होकर सनाथ हो जावे, अब इस विषय में देर न करना चाहिये ॥ ५० ॥ इन लोगों का ऐसा वचन सुनकर बृहस्पति ने कहा—

क्व तिष्ठति गतः कुत्र कुत्र वा मृगयामहे ॥ ४८ ॥ न नाकः शोभते तेन विना देवगणैः सह ॥ सुपुत्रेण विना यद्वत्कुलं श्रीमद्गुणान्वितम् ॥ ४९ ॥ उपायश्चिन्त्यतां सद्यः स्वर्लोको येन जायते ॥ सनाथश्च क्रियायुक्तो न विलम्बोऽत्र युज्यते ॥ ५० ॥ इति तेषां वचः श्रुत्वा गुरुर्वचनमब्रवीत् ॥ जानेऽहं स्वापराधेन लज्जया यत्र तिष्ठति ॥ ५१ ॥ रभसा लब्धकार्यस्य भुङ्क्ते स मघवा फलम् ॥ नृणां नीतिपरित्यागाद्विपाकाः स्युर्भयङ्कराः ॥ ५२ ॥ अहो राज्यमदैर्मत्तः कृत्याकृत्यमचिन्तयन् ॥ कृतवान् निन्दितं कर्म दृष्टादृष्टभयङ्करम् ॥ ५३ ॥ कुर्वन्ति बालिशा ह्येवं दैवोपहतबुद्धयः ॥ अपराधस्तथा जन्म स्यादि-

अपने अपराध की लज्जा से वह जहाँ स्थित है वह मैं जानता हूँ ॥ ५१ ॥ इन्द्र बिना विचारे काम करने का फल भोग रहा है, नीति का त्याग करने से मनुष्यों को भयंकर फल होता है ॥ ५२ ॥ अरे ! राज्य के मद से उन्मत्त, कृत्य और अकृत्य की चिन्ता न करते हुए, क्षयकारी दृष्ट तथा अदृष्ट कर्म करते हुए ॥ ५३ ॥ भाग्य के हत बुद्धि होकर

लोग मूर्खता के कार्य करते हैं जिनके अपराध से इस लोक तथा परलोक के फल नष्ट हो जाते हैं ॥ ५४ ॥ जहाँ पर वह इन्द्र है वहाँ पर हम अभी जावेंगे ऐसा कहकर सब लोग बृहस्पति को लेकर चले ॥ ५५ ॥ सुवर्ण कमलों के कानन से युक्त बड़े सरोवर पर इन्द्र को देखकर उनको प्रसन्न करने लगे जिससे उनको ज्ञान हो जावे ॥ ५६ ॥ तब बृहस्पति के समझाने पर कमल कलियों में से इन्द्र निकले, उनका मुख दीन था, वे कुरूप थे उनके नेत्र लज्जा से

हामुत्र निष्फलम् ॥५४॥ आधुना तत्र गच्छामो यत्र शक्रः स तिष्ठति ॥ इत्युक्त्वा निर्गताः सर्वे बृहस्पतिपुरोगमाः ॥ ५५ ॥ दृष्ट्वा सरसि विस्तीर्णे स्वर्णपङ्कजकानने ॥ तुष्टुवुर्देवराजं तं प्रबोधो येन जायते ॥ ५६ ॥ ततो गुरोः प्रबोधेन निर्गतः पद्मकुड्मलात् ॥ दीनाननो विरूपस्तु व्रीडाकुञ्चितलोचनः ॥ ५७ ॥ जग्राह चरणाविन्द्रो गुरोस्तस्याग्रजन्मनः ॥ इन्द्र उवाच ॥ त्राहि मां निष्कृतिं ब्रूहि पापस्यास्य बृहस्पते ॥ ५८ ॥ देवराजवचः श्रुत्वा जगौ विप्रो बृहस्पतिः ॥ प्रयागस्नानमात्रेण तत्क्षणादेव पातकात्

बन्द थे ॥ ५७ ॥ इन्द्र ने बृहस्पति के चरण पकड़ लिया। इन्द्र ने कहा— हे बृहस्पति! मेरी रक्षा करो, इस पाप से उद्धार होने का उपाय कहिये ॥ ५८ ॥ इन्द्र के बचन सुनकर विप्र बृहस्पति ने कहा— प्रयाग में स्नान करने ही से तुम उसी क्षण पाप से ॥ ५९ ॥ मुक्त होगे, हे इन्द्र! चलो तुमको लेकर हम लोग वहाँ चले, तब पुरोहित के साथ

लेकर इन्द्र वहाँ गये ॥ ६० ॥ और प्रयागतीर्थ में स्नान करके शीघ्र ही पापों से मुक्त हुए, तब बृहस्पति ने प्रसन्न होकर उनको वरदान दिया ॥ ६१ ॥ हे इन्द्र ! हमारे प्रसाद से शीघ्र पापों से निर्मुक्त होने पर तेरे शरीर में के हजार योनि के चिह्न हजार नेत्र हो जावें ॥ ६२ ॥ शची का पति (इन्द्र) ब्राह्मण के साक्ष्य से हजार नेत्रों से ऐसा शुशोभित

॥ ५९ ॥ मुच्यसे देवराज त्वं तत्र यामः सहैव ते ॥ अथ पुरोधसा सार्धमागत्य बलमर्दनः ॥ ६० ॥ सस्नौ सितासिते तीर्थे सद्यो मुक्तो ह्यघैस्ततः ॥ अथ देवगुरुस्तस्मै प्रसन्नस्तु वरं ददौ ॥ ६१ ॥ क्षीणपापस्य ते शक्र मत्प्रसादेन सत्वरम् ॥ सहस्रमेतद्योनीनां सहस्रं स्यादृशां तव ॥ ६२ ॥ तदैव द्विजवाक्येन शुशुभे स शचीपतिः ॥ लोचनानां सहस्रेण पङ्कजैरिव मानसम् ॥ ६३ ॥

इति श्री पद्मपुराणे उत्तरखण्डे माघमासमाहात्म्ये षोडशोऽध्यायः ॥ १६ ॥

हुआ जैसे मानसरोवर कमलों से शोभित होता है ॥ ६३ ॥

श्री पद्मपुराण के उत्तरखण्ड के माघमासमाहात्म्य का सोलहवाँ अध्याय समाप्त हुआ ॥ १६ ॥

व्यासजी ने कहा—तब देवता सहित ऋषियों से पूजा किया जाकर तथा गन्धर्वों से स्तुति किया जाकर इन्द्र अपनी अमरावती नगरी को गया ॥ १ ॥ इस प्रकार प्रयाग में स्नान करने से इन्द्र पाप रहित हो गये, तू भी हे कल्याणि ! देवताओं से सेवा किये जाने वाले प्रयाग को जाओ ॥ २ ॥ वहाँ पर जाने से पापों के नाश होंगे तथा स्वर्ग की अवश्य प्राप्ति होगी। अप्सरा ने कहा—इस प्रकार से इतिहास सहित उसके सुमङ्गल वचन को सुन कर ॥ ३ ॥ संभ्रम

व्यास उवाच ॥ ततो वृन्दारकैः सार्धं ऋषिभिश्चाभिपूजितः ॥ गन्धर्वैः स्तूयमानस्तु गतः शक्रोऽमरावतीम् ॥१॥ इत्थं सद्यो विपापोऽभूत् प्रयागे पाकशासनः ॥ अपि त्वं याहि कल्याणि प्रयागं देवसेवितम् ॥ २ ॥ सद्यः पापविनाशाय तथा स्वर्गतये दृढम् ॥ अप्सरा उवाच ॥ इति तस्य वचः श्रुत्वा सेतिहासं सुमङ्गलम् ॥३॥ तदैव सम्भ्रमापन्ना पादौ नत्वा द्विजस्य तु ॥ त्यक्त्वा बन्धुजनं सर्वं दासदासीं गृहं धनम् ॥४॥ सकलान् विषयान्रक्षो विषग्रासानिव स्फुटम् ॥ वपुश्च क्षणविध्वंसि पश्यन्ती निर्गता ह्यहम् ॥ ५ ॥ नरकार्णवसम्पातदारुणान्तकवह्निना ॥

में पड़ी हुई उसने ब्राह्मण के पैरों पर प्रणाम किया और सब बन्धुजन तथा दास दासी और घर तथा धन त्याग कर ॥४॥ हे राक्षस ! सब विषयों को प्रत्यक्ष विषग्रास के समान त्याग कर और शरीर को क्षण भर में नाश होने वाली देख कर मैं घर से निकली ॥ ५ ॥ नरक रूपी समुद्र में गिरने वाला, प्रलयाग्नि के समान दारुण, तथा हृदय रूपी व्याघ्र

के तप्यमान होते हुए ॥ ६ ॥ मैंने माघ मास में गंगा यमुना के संगम में जाकर स्नान किया, हे वृद्ध निशाचर ! उस स्नान के माहात्म्य को सुन ॥ ७ ॥ तीन दिन के स्नान से मेरे पाप नाश हो गये और बचे हुए सत्ताइस दिन के स्नान से जो पुण्य हुआ उससे मैं देवता हो गई ॥ ८ ॥ और गिरिजा की प्रिय सखी होकर कैलास में आनन्द करती हूँ तथा प्रयागराज के प्रसाद से मैं अपनी जाति का स्मरण रखती हूँ ॥ ९ ॥ हे क्रूर हृदय ! प्रयाग के माहात्म्य

हृदये कुणपव्याघ्र तदा तत्तप्यमानया ॥ ६ ॥ मया गत्वा कृतं स्नानं माघे मासि सितासिते ॥ तस्य स्नानस्य माहात्म्यं शृणु वृद्धनिशाचर ॥ ७ ॥ त्र्यहात् पापक्षयो जातः सप्तविंशतिभिर्दिनः ॥ शेषैर्मे यदभूत् पुण्यं तेन देवत्वमागता ॥ ८ ॥ रममाणा तु कैलासे गिरिजायाः प्रिया सखी ॥ जातिस्मरा च जाताऽहं प्रयोगस्य प्रसादतः ॥ ९ ॥ स्मृत्वा स्मृत्वा प्रयागस्य माहात्म्यं निकषात्मज ॥ स्नातुं सर्वामरैर्जुष्टं माघे माघे व्रजाम्यहम् ॥ १० ॥ इति राक्षस यत्पृष्टं त्वया विस्मितचेतसा ॥ तन्मया कथितं सर्वं चरित्रं प्रीतये तव ॥ ११ ॥ मत्प्रीतये चरित्रं स्वं त्वं ब्रूहि मम राक्षस ॥ कर्मणा केन जातोऽसि विरूपोऽतिभयङ्करः ॥ १२ ॥ श्मश्रुलो दीर्घदंष्ट्रश्च क्रव्यादो

को वारम्वार स्मरण करके मैं सब देवताओं के साथ माघ मास में वहाँ स्नान करने जाती हूँ ॥ १० ॥ हे राक्षस ! आश्चर्य युक्त होकर जो तुमने पूछा वह सब वृत्तान्त मैंने तुझको प्रसन्न करने के लिये कहा ॥ ११ ॥ हे राक्षस ! तुम भी मुझे प्रसन्न करने के लिये अपना सब चरित्र कहो, किस कर्म से तुम कुरूप और भयंकर हुए ॥ १२ ॥ दाढ़ी,

मोछ तथा बड़े दाढ़ वाले तुम पर्वत के गुहा में रहते हो। राक्षस ने कहा—जो इच्छा पूर्ति का पदार्थ देता है या लेता है, गुप्त बात को कहता है या पूछता है ॥ १३ ॥ हे भद्रे ! वह सज्जनों की प्रीति से ही होता है, वह सब (गुण) तुम में है, हे वामलोचने ! मैं अपने को निःसन्देह कृतकृत्य समझता हूँ ॥ १४ ॥ इस मुझ क्रूरजन्मा के भविष्य का उद्धार तुम्हीं

गिरिगह्वरे ॥ राक्षस उवाच ॥ इष्टं ददाति गृह्णान्ति गुह्यमाख्याति पृच्छति ॥१३॥ प्रीत्या हि सज्जनो भद्रे तत्तु सर्वं त्वयि स्थितम् ॥ त्वया सम्भावितो नूनं मन्येऽहं वामलोचने ॥१४॥ भाविनीं निष्कृतिं सद्यत्स्वयाऽस्य क्रूरजन्मनः ॥ अतो वक्ष्यामि ते भद्रे दुष्कृतं यत्स्वयं कृतम् ॥१५॥ निवेद्य सज्जने दुःखं यतः सर्वः सुखी भवेत् ॥ शृणु सुश्रोण्यहं काश्यां बह्वृचो वेदपारगः ॥ १६ ॥ जातः पुरा द्विजश्रेष्ठः कुले महति निर्मले ॥ राज्ञां दुष्कृतिनां भीरु शूद्राणां च तथा विशाम्॥१७॥वाराणस्यां कृतो घोरो मया दुष्टप्रतिग्रहः ॥ बहुधा बहुवारं च निषिद्धः कुत्सितो बहु

से शीघ्र होगा, अतएव हे भद्रे ! जो पाप मैंने स्वयं किया था तुमसे कहता हूँ ॥ १५ ॥ क्योंकि सज्जन को दुःख निवेदन करने से सब सुखी होता है, हे सुश्रोणि ! सुनो, मैं काशी में वेदों की अनेक ऋचाओं में पारंगत था ॥ १६ ॥ प्राचीन समय में बड़े निर्मल श्रेष्ठ ब्राह्मण के कुल में उत्पन्न हुआ था; हे भीरु ! राजा, पापी, शूद्र तथा वैश्यों से ॥ १७ ॥

मैंने काशी में भयंकर बड़े बड़े प्रतिग्रह लिये, बहुधा अनेक बार ये बड़े निन्दित और निषिद्ध थे ॥ १८ ॥ हे भद्रे ! मैंने दुष्ट प्रतिग्रह लेने में चाण्डाल को भी नहीं छोड़ा; मुझ मूढ़बुद्धि से और भी अनेक पाप हुए ॥ १९ ॥ कोई ऐसा पाप नहीं है जो मैंने न किया हो, हे वरवर्णिनि ! अब (पुण्य) क्षेत्र के भी दूसरे पापों को सुनो ॥ २० ॥ अविमुक्त क्षेत्र में अणुमात्र भी पाप करने से वह मेरु पर्वत के समान (बड़ा) हो जाता है, उस जन्म में मैंने किंचित मात्र

॥१८॥ चाण्डालस्यापि न त्यक्तो मया भद्रे प्रतिग्रहः ॥ अन्यच्च पातकं तत्र ममाऽभून्मूढचेतसः ॥१९॥ तन्नास्ति दुष्कृतं कर्म मया तत्र न यत्कृतम् ॥ अन्यच्च श्रूयतां दोषः क्षेत्रस्य वरवर्णिनि ॥२०॥ अविमुक्तेऽणुमात्रं यत्तदघं मेरुतां व्रजेत् ॥ न धर्मस्तु मया कश्चित् सञ्चितस्तत्र जन्मनि ॥ २१ ॥ ततो बहुतिथे काले मृतस्तत्रैव शोभते ॥ अविमुक्तप्रभावेण न चाहं नरकं गतः ॥२२॥ अविमुक्ते मृतः कश्चिन्नरकं नैति किल्बिषी ॥ अविमुक्ते कृतं किन्तु पापं वज्रीभवेद् दृढम् ॥ २३ ॥ वज्रलेपेन पापेन तेन मे जन्म राक्षसम् ॥ रौद्रं क्रूरतरं पापं सम्भूतं हिमपर्वते

भी धर्म का संचय नहीं किया ॥ २१ ॥ हे शोभने ! मैं बहुत दिनों के बाद वहीं मृत्यु को प्राप्त हुआ, तीर्थ में मरने के कारण मैं नरक में नहीं गया ॥ २२ ॥ अविमुक्त (तीर्थ में मरने वाला पापी नरक में नहीं जाता, किन्तु तीर्थ में किया हुआ पाप वज्र के समान दृढ़ हो जाता है ॥ २३ ॥ इस वज्रलेप पाप के कारण मैं भयंकर, अतिक्रूर, पापी राक्षस हिमालय

पर्वत पर जनमा ॥ २४ ॥ (इसके पूर्व) दो बार गिद्ध योनि में, तीन बार व्याघ्र, दो बार सर्प, एक बार उल्लू, तथा इसके बाद गाँव के सुअर की योनि में उत्पन्न हुआ था ॥ २५ ॥ उस जन्म में यह राक्षस का दसवाँ जन्म है, जिसमें पछत्तर हजार वर्ष बीत गये ॥ २६ ॥ हे भद्रे ! इस दुःखरूपी समुद्र से मेरा निस्तार नहीं है, हे सुभ्रु ! इस स्थान

॥२४॥ द्विर्जातो गृध्रयोनौ प्राक् त्रिर्व्याघ्रो द्विः सरीसृपः ॥ एकवारमुलूकश्च विड्वराहस्ततः परम् ॥२५॥ इदं तु दशमं जन्म राक्षसं यत्र जन्मनि ॥ अतीतानि सहस्राणि वर्षाणां पञ्च सप्ततिः ॥२६॥ नास्ति मे निष्कृतिर्भद्रे एतस्माद्दुःखसागरात् ॥ अत्र त्रियोजनं सुभ्रु निर्जन्तु हि मया कृतम् ॥२७॥ अनागसां च भूतानां बहूनां क्षयः कृतः ॥ कर्मणा तेन मे तत्तु दह्यते सततं मनः ॥ २८ ॥ त्वद्दर्शनसुधासिक्तं गतं शैत्यं मनो मम ॥ तीर्थं फलति कालेन सद्यः सङ्गः सतां खलु ॥ २९ ॥ अतः सत्सङ्गतिं सुभ्रु प्रशंसन्ति महात्मनः ॥ एतत्त कथितं सर्वं

को तीन योजन तक मैंने जन्तुहीन कर दिया ॥ २७ ॥ निरपराधी बहुतेरे प्राणियों का नाश किया, इन्हीं कर्मों से मेरा चित्त बराबर दहकता है ॥ २८ ॥ तुम्हारे दर्शन रूपी अमृत से सींचे जाने पर मेरे चित्त में ठंढक आई है, तीर्थ का फल तो समय पाकर मिलता है परन्तु सज्जनों का संग तुरन्त ही फल देता है ॥ २९ ॥ हे सुभ्रु ! इसी से महात्मा

लोग सत्संत की प्रशंसा करते हैं, मैंने अपने दुःख के ये सब कारण तुमसे कहे ॥ ३० ॥ हे सुभ्रु ! ऐसा विरला ही सज्जन होगा जो दूसरे के दुःख से दुखी न होता हो, जो उचित है सो तो तुम जानती है, अब इससे बढ़कर और क्या कहूँ ॥ ३१ ॥ अब इस बात का विचार करो कि मैं इस दुःखरूपी समुद्र के पार जैसे जाऊँ, सज्जनों का ऐश्वर्य

स्वस्य दुःखस्य कारणम् ॥३०॥ विरलः सज्जनः सुभ्रु परदुःखेन दूयते ॥ जानासयत्रयोचितं त्वं हि किञ्चिन्नो वच्म्यतः परम् ॥३१॥ अस्य दुःखोदधेः पारं कथं यामीति चिन्तयन् ॥ सज्जनानां समा भूतिः सर्वेषामुपजीविनाम् ॥३२॥ क्षीरार्णवः पयो दत्ते हंसाय न बकाय किम् ॥ दत्तात्रेय उवाच ॥ इति तस्य वचः श्रुत्वा दयार्द्रीकृतमानसा ॥ ३३ ॥ धर्मदाने मनः कृत्वा जगौ काञ्चनमालिनी ॥ अप्सरा उवाच ॥ करिष्ये निष्कृतिं रक्ष इदानीं खलु मा शुच ॥ ३४ ॥ प्रतिज्ञां तु दृढां कृत्वा यतिष्ये तव मुक्तये ॥ बहवोऽपि कृता माघे वर्षे वर्षे यथाविधि ॥३५॥

सब उपजीवियों के हित के लिए होता है ॥ ३२ ॥ क्या क्षीर सागर हंस को ही दूध देता है, बकुले को नहीं ? । दत्तात्रेयजी ने कहा—ऐसा उसका वचन सुनकर चित्त में दया लाकर ॥ ३३ ॥ तथा धर्मदान में मन लगाकर काँचन मालिनी ने कहा । अप्सरा बोली— हे राक्षस ! मैं अवश्य शीघ्र ही तुम्हारा निस्तार करूँगी ॥३४॥ मैंने दृढ़ प्रतिज्ञा कर ली है,तुम्हारी मुक्ति के लिए मैं प्रयत्न करूँगी, मैंने विधिपूर्वक प्रतिवर्ष अनेक माघ स्नान किये हैं ॥ ३५ ॥ और

श्रद्धापूर्वं मयाभद्र ब्रह्मक्षेत्रे सिताऽसिते ॥ तद्ददामि न सस्याऽरित तस्यधर्मस्य राक्षस ॥३६॥
गूढो धर्मोहि कर्तव्य इत्यूचुः पण्डिता जनाः ॥ आर्ते दानं प्रशंसन्ति मुनयो वेदवादिनः ॥३७॥
सागरे वर्षतो भद्र किं मेघस्य फलं भवेत ॥ ददामि माघजं पुण्य कृतमेक सितासिते ॥३८॥
तेन ते स्वर्गतिः सद्यो भविष्यति न संशयः ॥ अनुभूतं मया रक्षः स्वयं तत्पुण्यजं फलम्
॥३९॥ तत्तु दस्यामि ते मित्र सद्यः पापविनाशनम् ॥ निष्पीड्याऽथ ततो वासो जल कृत्वा
करांबुजैः ॥ ४० ॥ ददौ सा माघजं पुण्य तस्मै वृद्धाय रक्षसे ॥ दत्तात्रेय उवाच ॥ शृण

का पुण्य मैं तुझे देती हूँ ॥ ३८ ॥ उससे तुझे निःसन्देह अभी स्वर्ग-प्राप्ति होगी, हे राक्षस ! मैंने स्वयं उस पुण्य के फल का अनुभव किया है ॥ ३९ ॥ हे मित्र ! शीघ्र ही पाप को नाश करने वाले उस पुण्य को मैं तुझे देती हूँ, तब वस्त्र को निचोड़ उसके जल को करकमल से लेकर ॥ ४० ॥ उसने माघ स्नान से उत्पन्न पुण्य सहित उस

वृद्ध राक्षस को दिया। दत्तात्रेयजी ने कहा—हे राजन्! माघ मास में स्नान करने के विचित्र प्रभाव को सुनो ॥ ४१ ॥ तत्क्षण पुण्य प्राप्त करके उस (वृद्ध) ने राक्षसी शरीर त्याग दिया और तेजमय सूर्य के समान देवता रूप हो गया ॥ ४२॥ आनन्द से आँखों को फुलाकर, देवताओं के विमान पर चढ़कर, आकाश में अपनी क्रान्ति से दिशाओं को चमकाता हुआ ॥ ४३ ॥ दिव्यरूप धारण किये हुए, दूसरे सूर्य की तरह सुशोभित हुआ, तब उस काञ्चनमालिनी की प्रशंसा करने लगा

राजन् विचित्रं हि प्रभावं माघमासजम् ॥४१॥ तदैव प्राप्तपुण्यः सन् विमुक्त्वा राक्षसीं तनुम् ॥ सम्भूतो देवताकारस्तेजोभास्करविग्रहः ॥४२॥ देवयानं समारूढो हर्षेणोत्फुल्ललोचनः ॥ द्योतमानस्तदा व्योम्नि भासयन् प्रभया दिशः ॥ ४३ ॥ दिव्यरूपधरो रेजे द्वितीय इव भास्करः ॥ ततोऽभिनन्दयामास स तां काञ्चनमालिनीम् ॥४४॥ भद्रे वेत्तीश्वरो देवः कर्मणां यः फलप्रदः ॥ त्वया ह्युपकृतं सर्वं यत्र मे नास्ति निष्कृतिः ॥४५॥ इदानीमपि कारुण्यात् प्रसादानुग्रहं कुरु ॥ शिक्षां विधेहि मे देवि सर्वनीतिमयीं शुभाम् ॥४६॥ सर्वधर्मकरीं नूनं न कुर्वे पातकं यथा ॥

॥ ४४ ॥ हे भद्रे! कर्मों के फल देने वाला ईश्वर ही जान सकता है कि तुम सबपर उपकार करती हो नहीं तो मेरा निस्तार न होता ॥ ४५ ॥ अब भी कृपा करके मेरे ऊपर अनुग्रह करो, हे देवि! सब नीतियों से पूर्ण शुभ शिक्षा मुझे दो ॥ ४६ ॥ सब धर्मों के करने वाली शिक्षा दो जिसमें मैं पाप न करूँ, तुम्हारी आज्ञा पाकर इसको सुनकर मैं स्वर्ग

में जाऊँगा ॥ ४७ ॥ दत्तात्रेयजी ने कहा—हे राजन्! उसके कहे हुए धर्ममय प्रिय वचन को सुनकर काञ्चनमालिनी ने बड़ी प्रीतिपूर्वक उससे धर्म कहा ॥ ४८ ॥ उस दिव्य रूप धारण किये हुए, शान्त दूसरे सूर्य के समान व्यक्ति से कहा। काञ्चनमालिनी ने कहा— सर्वदा धर्म की सेवा करो प्राणियों की हिंसा त्याग दो, साधु पुरुषों की सेवा करो,

तां श्रुत्वा त्वदनुज्ञातः पश्चाद्यामि सुरालयम् ॥४७॥ श्रीदत्तात्रेय उवाच ॥ एतन्निशम्य तेनोक्तं प्रियं धर्मं मयं वचः ॥ अतिप्रीत्याऽब्रवीद्धर्मं राजन् काञ्चनमालिनी ॥४८॥ दिव्यरूपधरं शान्तं द्वितीयमिव भास्करम् ॥ काञ्चनमालिनी उवाच ॥ धर्मं भजस्व सततं त्यज भूतहिंसां सेवस्व साधुपुरुषान् जहि कामशत्रुम् ॥ अन्यस्य दोषगुणकीर्तनमाशु मुक्त्वा सत्यं वदार्चय शिवं स्मर वासुदेवम् ॥ ४९ ॥ देहेऽस्थिमांसरुधिरेऽहमिति त्यज त्वं जायासुतादिषु सदा ममतां विमुञ्च ॥ पश्याऽनिशं जगदिदं क्षणभङ्गनिष्ठं वैराग्यभावरसिको भव योगनिष्ठः ॥ ५० ॥

काम (इत्यादि) शत्रु को जीतो, दूसरे के गुण दोष का वर्णन त्यागकर सत्य बोलो शिव का तथा वासुदेव भगवान् का पूजन करो ॥ ४९ ॥ देह, अस्थि, मांस तथा रुधिर में अहङ्कार को छोड़ो, पत्नी पुत्र इत्यादि को सर्वदा ममता त्यागो, संसार को दिन रात क्षण-भंगुर देखो, वैराग्य भाव में चित्त लगाकर योगी बनो ॥ ५० ॥ मैंने प्रीति

पूर्वक तुमसे धर्म कहे हैं, शील युक्त हो इन सबको चित्त में रक्खो, राक्षस की शरीर को त्यागकर तथा देवता की शरीर धारण कर और तेज रूप होकर शीघ्रही स्वर्ग का सुख भोगों ॥ ५१ ॥ धर्म सुनकर प्रसन्न होकर तथा सन्तुष्ट होकर राक्षस ने कहा । राक्षस ने कहा– तुम नित्य प्रसन्न हो, तुम्हारा सर्वदा कल्याण हो ॥ ५२ ॥ सूर्य चन्द्र की स्थिति तक तुम

प्रीत्या मया निगदितं तव धर्मजातं चित्ते निधेहि सकलं भव शीलयुक्तः ॥ संत्यक्तराक्षस-वपुर्धृतदेवदेहो ज्योतिमयो व्रज यथासुखमाशु नाकम् ॥ ५१ ॥ श्रुतधर्मस्ततो हृष्टः सन्तुष्टो राक्षसोऽब्रवीत् ॥ राक्षस उवाच ॥ भव प्रमुदिता नित्यं सर्वदा शिवमस्तु ते ॥५२॥ आचन्द्रार्कं रमस्व त्व कैलासे शिवसन्निधौ ॥ उमयाऽखण्डितं प्रेम तवास्तु वरवर्णिनि ॥५३॥ धर्मनिष्ठा तपो-निष्ठा मातस्त्वं भव सर्वदा ॥ माऽस्तु लोभः शरीरे ते आपन्नार्तिं सदा हर ॥५४॥ दत्तात्रेय उवाच ॥ इत्युक्त्वा स प्रणम्याथ स तां काञ्चनमालिनीम् ॥ जगाम रक्षसः स्वर्गं गन्धर्वैर्बहुशः स्तुतः

शिव के समीप आनन्द करो, हे वरवर्णिनि ! उमा के साथ तुम्हारा अखण्ड प्रेम बना रहे ॥ ५३ ॥ हे माता तुम सर्वदा धर्मनिष्ठा, तथा तपनिष्ठा बनी रहो, तुम्हारे शरीर में लोभ न हो, दुखियों के क्लेश को सदा हरण करो ॥ ५४ ॥ दत्तात्रेयजी ने कहा– ऐसा कहकर उस काञ्चनमालिनी को प्रणाम करके अनेक गन्धर्वों में स्तुति किया जाता हुआ वह

राक्षस स्वर्ग में गया ॥ ५५ ॥ तब देवकन्याओं ने वहाँ आकर प्रसन्न होकर काञ्चनमालिनी के मस्तक फूलों की वृष्टि किया ॥ ५६ ॥ और उसको छाती से लगाकर इन कन्याओं ने कहा—हे भद्रे ! तुमने राक्षस का विचित्र उद्धार किया ॥ ५७ ॥ इस दुष्ट के भय से कोई इस जंगल में प्रवेश नहीं करता था, अब हम लोग निर्भय होकर यहाँ पर सुख

॥५५॥ देवकन्यास्तदाऽऽगत्य ववपुः पुष्पवृष्टिभिः ॥ तस्याः काञ्चनमालिन्या मूर्ध्नि हर्षसमाकुलाः ॥५६॥ तामालिंग्य ततः प्रोचुः कन्यकास्तु प्रियं वचः ॥ कन्या ऊचुः ॥ कृतं भद्रे त्वया चित्रं रक्षसो हि विमोचनम् ॥ ५७ ॥ दुष्टस्यास्य भयात् कश्चित् विश्यत्यस्मिन्न कानने ॥ अधुना निर्भया ह्यत्र विचरामो यथासुखम् ॥ ५८ ॥ दत्तात्रेय उवाच श्रुत्वा तद्वचनं राजन् तासां काञ्चनमालिनी ॥ ह्यष्टा तेनैव दानेन कृतकृत्या सती तदा ॥ ५९ ॥ तं राक्षसं काञ्चमालिनी तदा गन्धर्वकन्या परिमोच्य सत्वरम् ॥ क्रीडन्त्यभूमिः प्रययौ हरालयं प्रीत्याऽश्रुपूर्णातिप-

पूर्वक विचरेंगी ॥ ५८ ॥ दत्तात्रेयजी ने कहा— हे राजन् ! काञ्चनमालिनी उनके वचन को सुनकर उस दान से प्रसन्न और कृतार्थ हुई ॥ ५९ ॥ तब वह परोपकारिणी गन्धर्व कन्या काञ्चनमालिनी उस राक्षस को शीघ्र मुक्त करके आँखों में प्रीति के आँसू भरे इनके साथ क्रीडा करती हुई शिव के स्थान को गई ॥ ६० ॥ वर कन्याओं से कहे हुए इस संवाद

को जो मनुष्य भक्ति पूर्वक सुनता है उसको राक्षसों से बाधा नहीं होती और उसकी बुद्धि धर्म में होती है ॥ ६१ ॥

रोपकारिणी ॥ ६० ॥ संवादमेतं वरकन्यकेरितं भक्त्या परं यो हि शृणोति मानवः ॥ न बाध्यते जातु सदा स राक्षसैर्धर्मे मतिस्तस्य भृशं प्रजायते ॥ ६१ ॥

इति श्री पद्मपुराणे उत्तरखण्डे माघमाहात्म्ये वसिष्ठदिलीपसंवादे राक्षसमोक्षो नाम सप्तदशोऽध्यायः ॥ १७ ॥

श्री पद्मपुराण के उत्तरखण्ड के माघमाहात्म्य के वशिष्ठ और दिलीप के संवाद में राक्षसमोक्ष नाम का सत्रहवाँ अध्याय समाप्त हुआ ॥ १७ ॥

वसिष्ठजी ने कहा—मैंने दत्तात्रेयजी का कहा हुआ माघमाहात्म्य कहा, अब मैं माघ मास के स्नान से उत्पन्न फल को कहता हूँ ॥ १ ॥ हे परन्तप ! माघ स्नान सब यज्ञों में श्रेष्ठ, सब दानों का फल देने वाला, तथा सब व्रत और तप के तुल्य है ॥ २ ॥ हे दिलीप ! माघ स्नान से मनुष्य लोग (मातृ पितृ) कुल के पितरों को स्वर्ग में

वसिष्ठ उवाच ॥ कथितं माघमाहात्म्यं दत्तात्रेयेण भाषितम् ॥ अधुनाऽहं प्रवक्ष्यामि माघस्य स्नानजं फलम् ॥१॥ सर्वक्रतुवरिष्ठं तत्सर्वदानफलप्रदम् ॥ सर्वव्रततपस्तुल्यं माघस्नानं परंतप ॥२॥ स्नानेन माघस्य दिलीप मानवाः पितॄन्दिवि स्थाप्य कुलद्वयस्य ॥ स्वर्गं प्रयान्ति स्वयमुज्ज्वलानना वरैर्विमानै रुचिरैश्च कामगैः ॥३॥ यो माघमासि नभसि सूर्यकराभिताम्रे स्नानं समाचरित चारुनदीप्रवाहो ॥उद्धृत्य सप्तपुरुषान् पितृमातृवंशे स्वर्गं प्रयाति वरमाल्यधरो नरोऽसौ ॥ ४ ॥ ये मानवाः पापकृतोऽपि सर्वदा सदा दुराचारता विमार्गगाः ॥ स्नात्वा हि माघे

स्थापन करके स्वयं उज्ज्वल मुख होकर स्वेच्छाचारी श्रेष्ठ सुन्दर विमानों पर (चढ़कर) स्वर्ग को जाते हैं ॥ ३ ॥ जो माघ मास में नदी के सुन्दर प्रवाह में आकाश में सूर्य की ताँबे के रंग की किरण रहते (अर्थात् अरुणोदय में) स्नान करता है वह पिता तथा माता के वंश के सात पुरुषों का उद्धार करके सुन्दर माला धारण करके स्वर्ग में जाता है ॥ ४॥

सर्वदा पाप करने वाले, सदा दुराचार में मग्न तथा कुमार्गी मनुष्य भी माघमास में स्नान तथा हरि का पूजन करने से पाप के बड़े समुदाय से निर्मुक्त होकर भगवान् के समान शरीर वाले हो जाते हैं ॥ ५ ॥ सत्य से हीन, माता पिता से दूषित, विना आश्रम के अथवा अपने आश्रम के छोड़े हुए तथा जो लोग पाखंडी हैं वे भी प्रयाग में माघमास में तीन दिन स्नान करने से सज्जनों की गति प्राप्त करते हैं ॥ ६ ॥ संसार में पुण्यतीर्थों में माघमास का स्नान मनुष्यों को अति

हरिमर्चयन्ति ये मुञ्चन्ति तेऽपीह महाघसञ्चयम् ॥५॥ सत्येन हीनाः पितृमातृदूषिता अनाश्रम-
स्थाश्रमधर्मवर्जिताः ॥ ये दाम्भिकास्तेऽपि नराः सतां गतिं स्नानैः प्रयान्त्यत्र हि माघसम्भवैः ॥६॥
पुण्येषु तीर्थेषु च माघमासजं स्नानं नराणामतिदुर्लभं भुवि ॥ तस्माद्यथा ब्रह्मविदां स्थितिर्वरा
सम्प्राप्यते नात्र विचारणा मम ॥७॥ माघे तपोदानजपप्रसेवनं स्नानं हरेः पूजनमक्षयंनृप ॥
तस्माद्यथाशक्ति नरैः प्रयत्नात् स्नात्वा प्रदेयं वसनादिकाञ्चनम् ॥ ८ ॥ माघेऽन्नदाताऽमृतपः
सुरालये हेम्नश्च दाता बलभित्समीपगः ॥ दीपाग्निवासांसि ददन्नरः सदा सूर्यस्य लोके वसति

दुर्लभ है इससे मनुष्य ब्रह्मवेत्ताओं की गति को प्राप्त होता है—इसमें कोई सन्देह नहीं है ॥ ७ ॥ हे राजन् ! माघ में तप दान तथा जप करना और हरि भगवान् का पूजन सब अक्षय होते हैं। अतएव मनुष्य को प्रयत्न से स्नान करके यथाशक्ति वस्त्र,अन्न तथा सुवर्ण का दान करना चाहिये ॥ ८ ॥ माघ में अन्न दान करने वाला स्वर्ग में अमृत पीता है, सुवर्ण दान

करने वाला इन्द्र के समीप जाता है, दीपक अग्नि तथा वस्त्र दान देने वाला मनुष्य प्रभावयुक्त होकर सूर्य लोक में निवास करता है ॥ ९ ॥ यज्ञ से, दान से, उज्वल तप से, दृढ़ ब्रह्मचर्य से तथा श्रेष्ठ योग सेवा से पापी लोग उतने शुद्ध नहीं होते जितने माघमास में तीर्थ में स्नान करने से होते हैं ॥ १९ ॥ जो लोग माघमास में आधे उगे हुए सूर्य में श्रेष्ठ तीर्थ में स्नान करते हैं वे पापी भी दुःखों के समुदाय के कष्ट को नहीं सहते तथा यम की यातना भी नहीं भोगते ॥ ११ ॥

प्रभामयः ॥ ९ ॥ यज्ञैश्च दानैश्च तपोभिरुज्ज्वलैः सुब्रह्मचर्यैर्वरयोगसेवया ॥ शुद्धा भवन्तीह तथा न पापिनः स्नानैर्यथा तीर्थभवैस्तु माघजैः ॥ १० ॥ दुःखौघसन्तप्तिमसह्य यातनां यामीं न ते यान्त्यपि पापकारिणः ॥ ये माघमासे वरतीर्थमज्जनंकुर्वन्ति चार्द्धोदितसूर्यमण्डले ॥११॥ स्नात्वा च माघे हरिमर्चयन्ति ये स्वर्गच्युता भूपतयो भवन्ति ते ॥ भव्याः सुरूपाः सुभगाः प्रियंवदा-धर्मान्विता भूरिधना : शतायुषः ॥ १२ ॥ दीप्तानले काष्ठचयो यथा हुतो भस्मावशेषो भवतीह तत्क्षणात् ॥ स्नानेन माघस्य तथा विलीयते क्षुद्रोऽपि पापौघमहाघसञ्चयः ॥१३॥

माघ में स्नान करके जो हरिभगवान् का पूजन करते हैं वे स्वर्ग से लौटकर राजा होते हैं, तथा दिव्य. स्वरूपवान्, भाग्यवान् प्रिय बोलने वाले, धर्मयुक्त, बड़े धनी और सौ बरस की आयुष्य वाले होते हैं ॥ १२ ॥ जिस प्रकार जलती हुई अग्नि में लकड़ी कासमूह उसी क्षण भस्म हो जाता है और उसका कुछ शेष नहीं रह जाता, उसी प्रकार से माघ मास में स्नान करने से छोटे तथा बड़े बड़े पापों के समुदाय भी नष्ट हो जाते हैं ॥ १३ ॥ शरीर, वाणी तथा मन से जान या

अनजान से किये हुए सभी पाप किसी श्रेष्ठ तीर्थ में माघमास स्नान करने से हृदय में स्थित विष्णुभगवान् जैसा शीघ्र ही जला देते हैं ॥ १४ ॥ हे राजन् ! पापों के फल भोगते हुए भी मनुष्य यदि प्रमाद से भी कभी माघ में स्नान कर लें तो इसी से उनके पाप नष्ट हो जाते हैं यह निश्चय है ॥ १५ ॥ गन्धर्व की कन्या प्राचीन काल में राजा के शाप

कायेन वाचा मनसाऽपि पातकं ज्ञातं यदज्ञानमलं कृतं नरैः ॥ स्नानं तु माघे वरतीर्थसम्भवं सर्वं दहेद्विष्णुरिवाशु हृद्गतः ॥१४॥ सम्भुज्यमानाऽघफलं हि पार्थिव प्रमादतोऽपीह नृणां कदाचन ॥ स्नानं तु माघस्य यदि प्रसज्जते तदैव तत्संक्षयमेति निश्चितम् ॥ १५ ॥ गन्धर्वकन्याः पृथिवीशशापजं सम्भुज्यमानाऽघफलं दुरत्ययम् ॥ स्नानाद्विमुक्ताः खलु माघसम्भवाद्वाक्यात् पुरा लोमशजातमद्भुतम् ॥१६॥ श्रुत्वैतत्पार्थिवः प्रीत्या नत्वा तत्पादपङ्कजम् ॥ श्रद्धया परया नम्रस्तं पप्रच्छ पुरोहितम् ॥ १७ ॥ दिलीप उवाच—भगवन् ब्रूहि कन्याभिः शापो ह्यभिगतः कुतः ॥ कस्यापत्यानि तास्तासां नाम किं कीदृशं वयः ॥१८॥ कथं लोमशवाक्येन

से पाप के भयंकर फल को भोगती हुई, लोमश ऋषि के वचन से माघ मास में स्नान करके पाप से मुक्त हुई, यह आश्चर्य है ! ॥ १६ ॥ राजा ने यह सुन गुरु चरण कमल पर नमस्कार करके, परम श्रद्धा से विनीत भाव से पुरोहित से पूछा ॥ १७ ॥ दिलीप ने कहा—हे भगवन् ! कन्याओं को कहाँ से शाप मिला ? वे कन्या किसकी थीं, उनके क्या नाम थे

और उनकी क्या उमर थी ? ॥ १८ ॥ किस प्रकार वे लोमश ऋषि के वाक्य से पिशाची शाप से विमुक्त हुईं, उन्होंने माघ मास में कहाँ स्नान किया, और संख्या में कितनी थीं ? ॥ १९ ॥ वसिष्ठजी ने कहा—हे श्रेष्ठ राजा ! इस धर्मपूर्ण अपूर्व कथा को सुनो, जिस प्रकार अरणि से अग्नि निकलती है उसी प्रकार यह कथा धर्म और सन्तान को उत्पन्न

पशाच्यात् शापसम्भवात् ॥ विमुक्ताः कुत्र ताः सस्नुर्माघं ताः कति संख्यया ॥ १९ ॥ वसिष्ठ उवाच—श्रूयतां राजशार्दूल धर्मगर्भां परां कथाम् ॥ यथाऽरणिर्वह्निगर्भा धर्मसूर्वह्निसूरपि ॥२०॥ गन्धर्वः सुखसगीतिस्तस्य कन्या विमोहिनी ॥ सुशीलस्य सुशीला च सुस्वरा स्वरवेदिनः ॥२१॥ सुतारा चन्द्रकान्तस्य चन्द्रिका सुप्रभस्य च ॥ इमानि वरनामानि तासामप्सरसां नृप ॥२२॥ कुमार्यः पञ्च ताः सर्वा वयसा सुसमाहिताः ॥ शोभन्ते ताः स्त्रियो नित्यं भोगिन्य इव सर्वदा ॥ २३ ॥ चन्द्रादिव विनिष्क्रान्ताश्चन्द्रिकेव समुज्ज्वलाः ॥ चन्द्राननाः

करती है ॥ २० ॥ सुख सङ्गीति नामक गन्धर्व की कन्या विमोहिनी थी, सुशीला की कन्या तथा स्वरवेदी की कन्या सुस्वरा नाम की थी ॥ २१ ॥ चन्द्रकान्त की कन्या सुतारा तथा सुप्रभ की कन्या चन्द्रिका थी, हे राजन् ! ये सुन्दर नाम इन अप्सराओं के थे ॥ २२ ॥ ये पाँचों कन्या सब वय में समान थीं, नित्य भोग करने वाली स्त्रियों के समान सर्वदा शोभती थीं ॥२३॥ ये चन्द्रमा से निकली हुई, चन्द्रमा के समान बड़ी उज्ज्वल थीं, चन्द्रानना तथा सुकेशी चन्द्रमा

के अमृत समान रसयुक्त थीं ॥२४॥ नेत्रों को आनन्द करने वाली वैसी ही थी जैसे रात खिलनेवाले कमल को चन्द्र प्रभा; ये कन्या अति ललित, बड़ी मनोहर ॥ २५ ॥ ऊँचे पयोधर वाली पद्मनी, वैशाख मास की कमलिनी के समान थीं, यौवन दरसाती हुई नये पत्तों वाली लता के समान थीं ॥ २६ ॥ सुवर्ण के समान गौर वर्ण की सुवर्ण के समान चमकती

सुकेशिन्यश्चन्द्रामृतरसाधराः ॥२४॥ नेत्रेष्वानन्दकारिण्यः कौमुदी कैरवेष्विव ॥ लावण्य-पिण्डसम्भूता वररूपा मनोहराः ॥२५॥ उद्भिन्नकुचपद्मिन्यः पद्मिन्य इव माधवे ॥ उन्मील्य यौवनं कान्तं वल्लीव नवपल्लवैः ॥२६॥ हेमगौराश्च हेमाभा हेमालङ्कारभूषिताः ॥ हेमचम्पकमालिन्यो हेमच्छविसुवाससः ॥ २७ ॥ स्वरग्रामावलीढासु विविधामूर्च्छनासु च ॥ तानगानविनोदेषु वेणुवीणाप्रवादने ॥२८॥ मृदङ्गनादसम्भिन्नलास्यमार्गलयेषु च ॥ चित्रादिषु विनोदेषु कलासु च विशारदाः ॥ २९ ॥ एवम्भूतास्तु ताः कन्या मुमुदुः क्रीडनर्वरैः ॥ पितृभिर्लालिताः

हुई तथा सुवर्ण के अलंकार से विभूषित स्वर्ण की चम्पाकली धारण किये तथा सुवर्ण की छवि वाले सुन्दर वस्त्र पहिरे ॥ २७ ॥ स्वर ग्रामों (समूहों) से मिश्रत तथा नाना प्रकार की मूर्च्छना, तान गान, विनोद तथा बाँसुरी और बीन बजाने में ॥ २८ ॥ मृदङ्गनाद, भिन्न-भिन्न प्रकार के लास्य, मार्ग तथा लय में और विचित्र विनोद और कलाओं में निपुण थीं ॥ २९ ॥ इस प्रकार की ये कन्या सुन्दर क्रीड़ा से आनन्द करती थीं, माता पिता से लाड़ की जाती हुई ये एक

बार कुबेर के स्थान में विचरती थीं ॥३०॥ कौतुक से एक बार पाँचों ने मिल कर माघ मास में एक वन से दूसरे वन में मन्दार के फूल तोड़ती हुई ॥ ३१ ॥ गौरी की आराधना के लिये ये वराङ्गना अच्छोद (सुन्दर जल वाले) सरोवर पर गईं, सुवर्ण के सुन्दर कमल तथा जल कमलों को लेकर ॥ ३२ ॥ हीरे के समान स्वच्छ स्फटिक पूर्ण सरोवर में स्नान

सत्यश्चेरुश्च धनदालये ॥ ३० ॥ कौतुकादेकदा पञ्च मिलित्वा मासि माधवे ॥ कन्या मन्दार पुष्पाणि विचिन्वन्त्यो वनाद्वनम् ॥ ३१ ॥ गौरीं समाराधयितुं वराङ्गनाः कदाचिदच्छोद-सरोवरं ययुः ॥ हेमाम्बुजानि प्रवराणि ताः पुनस्तस्मादुपादाय वरोत्पलैः सह ॥ ३२ ॥ वैडूर्यशुद्धस्फटिकप्रकुट्टिमे स्नात्वा तडागे परिधाय चाम्बरम् ॥ मौनेन च स्थण्डिलपिण्डिकामयीं स्वर्णस्य सिक्ताभिरुमां विनिर्ममुः ॥ ३३ ॥ समर्च्य तां चन्दनचन्द्रकुङ्कुमैरभ्यर्च्य गौरीं वर-पङ्कजादिभिः ॥ नानोपचारैश्च सुभक्तिभाविता लास्यप्रयोगैर्ननृतुः कुमारिकाः ॥ ३४ ॥ गन्धारमाश्रित्य वरं स्वरं ततो गेयं सुतारध्वनिभिः समूर्च्छनम् ॥ एणीदृशस्ताः प्रजगुः कला-

करके तथा वस्त्र पहिन कर मौन धारण किए हुये उस स्थान के सोनहले बालुओं से उन्होंने उमा की मूर्ति बनाया ॥३३॥ और चन्दन, कपूर, कुङ्कुम से तथा सुन्दर कमलों से इस मूर्ति की पूजा करके ये कुमारियाँ नाना प्रकार के उपचारों से भक्ति से पूजन करके ताल देकर नाचने लगीं ॥ ३४ ॥ फिर सुन्दर गान्धार सुर में ऊँची ध्वनी से मूर्छना

सहित ये मृगनयनी अच्छे प्रबन्ध की गीत सुन्दर सुर में गाने लगीं ॥ ३५ ॥ जब ये कन्या रसों की वर्षा करने वाले तथा आनन्द देने वाले सुन्दर सुर में गा रही थीं और नाचने में निमग्न थीं, उसी समय अच्छोद नाम के श्रेष्ठ तीर्थ में वेदनिधि मुनि के पुत्र अग्निप ऋषि स्नान को गये ॥ ३६ ॥ यह युवा ऋषि

क्षरं चारुप्रबन्धं गतिभिश्च सुस्वरम् ॥ ३५ ॥ तस्मिन् सुनादे रसवर्षहर्षदे कन्यास्वलं निर्भरवृत्तिवृत्तिषु ॥ अच्छोदतीर्थप्रवरे तदा गतः स्नातुं मुनेर्वेदनिधेः सुतोऽग्निपः ॥ ३६ ॥ रूपेण निःसीमतरो वराननः पाथोजपत्रायतलोचनो युवा ॥ विस्तीर्णवक्षाः सुभुजोऽतिसुन्दरः श्यामच्छविः काम इवापरो हि सः ॥३७॥ स ब्रह्मचारी सुशिखो विराजते दण्डेन युक्तो धनुषैव मन्मथः ॥ एणाजिनप्रावरणः सुसूत्रधृक् हेमाम्भमौञ्जीकटिसूत्रमेखलः ॥३८॥ तं दृष्ट्वा ब्राह्मणं वालास्तस्तत्र सरसीतते ॥ जहृषुः कौतुकाविष्टाः कोऽयं नो नयनातिथिः ॥ ३९ ॥ संत्य-

रूप में अद्वितीय, सुन्दर मुख का, कमल के पत्ते समान लम्बे नेत्र वाला, विशाल छाती वाला, सुन्दर भुजा वाला, श्याम छवि का, अति सुन्दर, दूसरे कामदेव के सदृश था ॥ ३७ ॥ शिखा सहित वह ब्रह्मचारी दण्ड लिए हुए धनुष धारण किए हुए कामदेव के समान शोभायमान था। वह मृगचर्म ओढ़े सुन्दर यज्ञोपवीत धारण किए हुए कमर में सोने की सी मूँज की करधनी पहिरे था ॥ ३८ ॥ उस ब्राह्मण को वहाँ सरोवर तट पर देख कर वे कन्या बड़ी प्रसन्न

हुई और आश्चर्य युक्त होकर (आपस में कहने लगीं कि) यह हम लोगों के नेत्रों का कौन अतिथि है ॥ ३९ ॥ नाचना गाना छोड़कर वे सब इसको देखने की लालसा में पड़ गईं और बहेलिये के बाण से घायल हरिणी के समान वे कामदेव के बाण से घायल हो गईं ॥ ४० ॥ ये पाँचों मुग्ध कन्या घबड़ाहट में "देखो, देखो" ऐसा कहती हुई उस

क्तगीतनृत्यास्तास्तस्यालोकनलालसाः ॥ हरिण्यो लुब्धकेनेव विद्धाः कामेन सायकैः ॥४०॥
पश्य पश्येति जल्पन्त्यो मुग्धाः पञ्च सुसम्भ्रमम् ॥ तस्मिन् विप्रवरे यूनि कामदेवभ्रमं ययुः ॥४१॥
पुनः पुनस्तमभ्यर्च्य नयनैः पंकजैरिव ॥ पश्चाद्विचारमारब्धमप्सरोभिः परस्परम् ॥ ४२ ॥
यद्ययं कामदेवो हि रतिहीनः कथं भवेत् ॥ अथायमश्विनौ देवौ तौ देवौ युगचारिणौ ॥४३॥
गन्धर्वः किन्नरो वाथ सिद्धो वा कामरूपधृक् ॥ ऋषिपुत्रोऽथवा कश्चिद्वा पुरुषोत्तमः ॥४४॥
अथवा कोऽपि देवोऽयं धात्रा सृष्टो हि नःकृते ॥ यथा भाग्यवतामर्थे निधानं पूर्वकर्मभिः ॥४५॥

श्रेष्ठ ब्राह्मण युवा के चित्त में कामदेव का भ्रम उत्पन्न करने लगीं ॥ ४१ ॥ बारम्बार अपने कमलरूपी नयनों से उसका पूजन करती हुईं इन अप्सराओं ने विचार करना आरम्भ किया ॥ ४२ ॥ कि यदि यह कामदेव हों तो रति के विना कैसे हो सकते हैं, यदि यह देव अश्विनी कुमार होते तो दोनों साथ होते ॥ ४३ ॥ यह कोई गन्धर्व हैं, किन्नर है अथवा कामरूप धारण किये कोई सिद्ध है, अथवा किसी ऋषि का पुत्र है या कोई उत्तम मनुष्य है ॥ ४४ ॥ यह कोई भी

हो, विधाता ने इसको हम लोगों के लिये ही बनाया है, जैसे पूर्व कर्मों के प्रभाव से भाग्यवान् की सम्पत्ति प्राप्त होती है ॥ ४५ ॥ उसी तरह करुणाजल की लहर से चलायमान आर्द्र चित्त से गौरी हम कुमारियों के लिये उत्तम वर लाई हैं ॥ ४६ ॥ हे नृपश्रेष्ठ ! पाँचों कन्या परस्पर कह रही थीं कि यह तुमसे वरा गया, तथा मुझसे वरा गया जैसे तुमसे वरा

तथास्माकं कुमारीणां गौर्या नीतो वरोत्तमः ॥ करुणाजलकल्लोलप्लवाद्रीकृतचित्तया ॥४६॥
मया वृतस्त्वया चायं त्वया वृत्तस्तथा मया ॥ एवं पञ्चसु कन्यासु वदन्तीषु नृपोत्तम ॥४७॥
श्रुत्वा तद्वचनं तत्र कृतमाध्याह्निकक्रियः ॥ आलोच्च हृदये सोऽपि विघ्नमेतदुपस्थितम् ॥४८॥
ब्रह्मविष्णुगिरिशादयः सुरा ये च सिद्धमुनयः पुरातनाः ॥ तेऽपि योगबलिनो विमोहिता
लीलया तदबलाभिरद्भुतम् ॥४९॥ योषितां नयनतीक्ष्णसायकभ्रूलतासु दृढचापनिर्गतैः ॥
धन्विना मकरकेतुना हतः कस्य नो पतति हा मनोमृगः ॥५०॥ तावदेव नयधीर्विराजते ताव-

गया वैसे मुझसे वरा गया ॥ ४७ ॥ वहाँ पर इनके वचन को सुनकर मध्याह्न की क्रिया करके उस (ब्रह्मचारी) ने मन में विचार किया कि यह तो बड़ा विघ्न उपस्थित हुआ ॥ ४८ ॥ ब्रह्मा, विष्णु, शिव, इत्यादि देवता तथा प्राचीन वृद्ध मुनि और योगबल वाले ऋषि लोग भी अबलाओं की लीला से मुग्ध हो गये, यह बड़ा आश्चर्य है ॥ ४९ ॥ स्त्रियों के भ्रूलता रूपी कठोर धनुष से निकले हुए नयन रूपी तीखे बाणों से हा ! धनुषधारी कामदेव से हत किसका मन रूपी

मृग वेधा नहीं जाता ॥ ५० ॥ तभी तक नीति और बुद्धि रहती है, तभी तक पाप से भय रहता है, तभी तक अत्यन्त दृढ़-चित्तता रहती है, तभी तक कुल की गणना रहती है ॥ ५१ ॥ तभी तक तप की गम्भीरता, तभी तक मनुष्य यम नियम का पालन कर सकते हैं, जब तक स्त्रियों के नयन रूपी बाणों से काम मोहित मनुष्य शीघ्र वेधा नहीं जाता ॥५२॥

देव वृजिनाद्भयं भवेत् ॥ तावदेव दृढचित्तता भृशं तावदेव गणना कुलस्य च ॥५१॥ तावदेव तपसः प्रगल्भता तावदेव यमसेवनं नृणाम्॥यावदेव वनितेक्षणेषुभिर्मुह्यते द्रुतमदर्न पूरुषः ॥५२॥ मोहयन्तु मदयन्तु रागिणां योषितः सुललितैर्मनोहरः मोहयन्ति मदयन्ति मामिमा धर्मरक्षण-परं हि वैर्गुणैः ॥५३॥ मांसरक्तमलमूत्रनिर्मिते योषितां वपुषि निर्घृणेऽशुचौ ॥ कामिनस्तु परिकल्प्य चारुतां मा रहन्तु भुवि मूढचेतसः ॥ ५४ ॥ दारुणो हि परिकीर्त्यतेऽङ्गनासन्निधिर्वि-मलबुद्धिभिर्बुधैः ॥ यावदत्र न समीपगा इमास्तावदेव हि गृहं व्रजाम्यहम् ॥ ५५ ॥ समीपे

विलासी जन के मन को स्त्रियाँ मनोहर सुन्दर लीला से मोहन करें और उन्मत्त करें (परन्तु) मुझे क्यों उन्मत्त करती और मोहती हैं, किन गुणों से धर्म की परम रक्षा हो सकती है ॥ ५३ ॥ स्त्रियों के मांस, रक्त, मल मूत्र से बने घिनौने, अपवित्र शरीर में कामी लोग सुन्दरता की कल्पना करके मूढचित्त वाले रमण न करें तो भला है ॥ ५४ ॥ विमल बुद्धि वाले महात्माओं ने स्त्रियों का समीप रहना कष्ट कारक कहा है (अतएव) जब तक ये समीप नहीं आतीं

मैं घर चला जाता हूँ ॥ ५५ ॥ जब तक ये वराङ्गना उसके पास नहीं आइं (उसके पहिले ही) वह ब्राह्मण वैष्णव प्रभाव से अन्तर्धान हो गया ॥५६॥ हे राजन्! जब यह अपने योगबल से अन्तर्धान हो गये, तब इस बुद्धिमान् ऋषिपुत्र का अद्भुत कर्म देख कर ॥ ५७ ॥ घबड़ाये हुए नेत्रों वाली ये कन्या हरिण के समान कातर हो गईं और घबड़ाये हुए

तस्य यावन्नैता गच्छन्ति वराः स्त्रियः ॥ वैष्णवेन प्रभावेण तावदन्तर्दधे द्विजः ॥५६॥ तस्य योगबलाद् भूप गतस्यादर्शनं तदा ॥ दृष्ट्वा तदद्भुतं कर्म ऋषिपुत्रस्य धीमतः ॥ ५७ ॥ वित्रस्तनयना बालाः कुरङ्ग्य इव कातराः ॥ सम्भ्रान्तहृदयाः शून्या ददृशुस्ता दिशो दश ॥५८॥ कन्यका ऊचुः—इन्द्रजालं स्फुटं वेत्ति मायां जानाति वा पुनः ॥ दृष्टोऽप्यदृष्टरूपोऽभूदित्यूचुश्च परस्परम् ॥ ५९ ॥ व्याप्तं च हृदयं तासां तदैव विरहाग्निना ॥ ज्वलद्दावानलेनेव सुस्निग्ध सान्द्रकाननम् ॥६०॥ त्यक्त्वैन्द्रजालिकीं विद्यां कान्तं दर्शय सत्वरम् ॥ स्वात्मान

नेत्रों से शून्य दसों दिशाओं में देखने लगीं ॥ ५८ ॥ कन्याओं ने कहा—यह भली-भाँति इन्द्रजाल अथवा माया जानता है, देखते-देखते अदृष्ट हो गया—ऐसा वे आपस में कहने लगीं ॥ ५९ ॥ तब इन सभों का हृदय विरह की अग्नि से व्याप्त हो गया (मानों) स्निग्ध और सघन वन दावानल में जलने लगा ॥ ६० ॥ हे कान्त! इन्द्रजाल की विद्या

त्याग कर अपना दर्शन दो तुमको पहिले ग्राम में मक्खी के समान करना उचित नहीं है ॥ ६१ ॥ हा अभाग्य ! विधाता ने तुमको रच कर हम लोगों को क्यों दिखलाया; जान पड़ता है कि हम लोगों को बड़ा कष्ट देने ही के निमित्त तुम बनाये गये हो ॥ ६२ ॥ क्या तुम्हारा चित्त निर्दयी है, क्या हम लोगों में तुम्हारी रुचि नहीं है, हे कान्त ! क्या तुम

नर्मतो युक्तं प्राग्ग्रासे मक्षिकोपमम् ॥ ६१ ॥ हा कष्टं दर्शितः कस्माद्धात्रा त्वं घटितः कुतः ज्ञातं महान् हि सन्तापहेतुस्त्वं हि विनिर्मितः ॥६२॥ कच्चित्ते निर्दयं चेतः कच्चिदस्मासु नो मतिः ॥ कच्चिद् धूर्तोऽसि हे कान्त कच्चिन्मुष्णासि नो मनः ॥६३॥ कच्चिन्न प्रत्ययोऽस्मासु कच्चिदस्मान् परीक्षसे॥कच्चिन्नृत्यकलाशीलः कच्चिन्मायाविशारदः॥६४॥कच्चिच्चित्ते प्रवेष्टुं च वेत्सि विज्ञान-लाघवम् ॥ कच्चिन्निष्क्रमणो पायं न जानासि कुतः पुनः ॥ ६५ ॥ कच्चिद्विनाऽप-राधं तु त्वमस्मासु प्रकुप्यसे ॥ कच्चिद् दुःखं न जानासि परेषां विप्रलम्भजम् ॥ ६६ ॥

धूर्त हो या क्या तुम हम लोगों के मन को चुराते हो ॥ ६३ ॥ क्या तुम हम लोगों का विश्वास नहीं करते अथवा हम लोगों की परीक्षा लेते हो; क्या तुम नाचते की कला में निपुण हो या माया में चतुर हो ॥ ६४ ॥ क्या किसी के चित्त में प्रवेश करने के विज्ञान के लाघव को जानते हो और इसमें से निकलने के उपाय को नहीं जानते ॥ ६५ ॥ क्या बिना किसी अपराध के तुम हम लोगों पर क्रोध करते हो, क्या दूसरों को धोखा देने से उत्पन्न दुःख को तुम नहीं

जानते ॥ ६६ ॥ हे हृदयेश्वर ! तुम्हारे दर्शन के बिना हम न जावेंगी, फिर से तुम्हार दर्शन की आशा करती हुई हम जी रही हैं ॥ ६७ ॥ जहाँ पर आप गये हो वहीं पर हम लोगों को शीघ्र ले चलो, तुम्हारा दर्शन हम लोगों के सन्ताप को तुरत हर लेगा तो वैसा ही करो ॥ ६८ ॥ सर्वथा दर्शन दो, और दया करो, सज्जन लोग किसी के नाश को

त्वद्दर्शनं विना नूनं हृदयेश्वर साम्प्रतम् ॥ न जीवामोऽथ जीवामः पुनस्त्वद्दर्शनाशया ॥ ६७ ॥ वयं च नीयतां तत्र शीघ्रं यत्र गतो भवान् ॥ त्वद्दर्शनं हरेत् सद्यः सन्तापं नः कुरुष्व तत् ॥ ६८ ॥ सर्वथा दर्शनं देहि कारुण्यं भज सर्वदा ॥ पर्यन्तं न प्रपश्यन्ति कस्यचित् सज्जना जनाः ॥ ६९ ॥

इति श्री पद्मपुराणे उत्तरखण्डे माघमाहात्म्ये वसिष्ठदिलीपसंवादे गन्धर्वकन्याविरहप्राप्तिर्नाम अष्टादशोऽध्यायः ॥ १८ ॥

नहीं देखते ॥ ६९ ॥

श्री पद्मपुराण में माघमाहात्म्य के दिलीप वसिष्ठ के सम्वाद में गन्धर्व कन्याओं की विरह प्राप्ति नाम का अठारहवाँ अध्याय समाप्त हुआ ॥ १८ ॥

व्यासजी ने कहा—उन कन्याओं ने इस प्रकार विलाप किया, और बहुत देर तक प्रतीक्षा करके माता पिता के भय से शीघ्र घर को जाने लगीं ॥ १ ॥ उसके प्रेम के बन्धन में बँधी हुई अत्यन्त विरह में व्याकुल होकर धर्य धारण करके किसी प्रकार से अपने घर आईं ॥ २ ॥ घर पर आकर वे सब जलयन्त्र के पास गिर पड़ीं, उनकी माताओं ने

व्यास उवाच—इत्थं विलप्य ताः कन्याः प्रतीक्ष्य च बहुक्षणम् ॥ पितुर्भयाद् गृहं गन्तुं शीघ्रमारेभिरे तः ॥१॥ तत्प्रेमनिगडैर्बद्धा भृशं विरहविक्लवाः ॥ कथञ्चिद्धैर्यमालम्ब्य ताः स्वं स्वं गृहमागताः ॥२॥ आगत्य पतिताः सर्वा जलयन्त्रसमीपतः ॥ किमेतन्मातृभिः पृष्टा कुतः कालात्ययोऽभवत् ॥ ३ ॥ कन्या ऊचुः—क्रीडन्त्यः किन्नरीभिस्तु सार्धं संगीतकं मुदा ॥ संस्थितास्तेन न ज्ञातं दिवसादि सरोवरे ॥ ४ ॥ पथि श्रान्ता वयं मातः सन्तापस्तेन नस्तनौ ॥ मोहेन महता वक्तुं न केनाप्युत्सहामहे ॥ ५ ॥ वसिष्ठ उवाच—इत्युक्त्वा लुलु-

पूछा—यह क्या ? तुम लोगों को इतना विलम्ब कहाँ हुआ ॥३॥ कन्याओं ने कहा—किन्नरियों के साथ खेलती हुई और आनन्दपूर्वक गाती हुई हम लोग सरोवर पर थीं। इसी से दिन का पता न चला ॥ ४ ॥ हे माता ! हम लोग मार्ग की थकी हैं, इसी से हम लोगोंके शरीरमें सन्ताप है, अति मोहके कारण हम लोगों को कुछ कहने का उत्साह नहीं होता ॥५॥

वसिष्ठजी ने कहा—ऐसा कह कर वे कुमारियाँ मणि भूमि पर लेटने लगीं और अपने भाव को छिपाती हुई मुग्ध कन्या माताओं से बात करने लगीं ॥ ६ ॥ उस समय कोई आनन्दपूर्वक क्रीड़ा-मयूर को नहीं नचाती, न कोई कौतूहल से पिंजड़े के सुग्गे को पढ़ाती है ॥ ७ ॥ कोई नेवले का लाड़ नहीं करती, न कोई मैंना को पुकारती है, अति मुग्ध होकर

ऊस्तत्र मणिभूमौ कुमारिकाः ॥ आकार गोपयन्त्यस्ता मुग्धा जल्पन्ति मातृभिः ॥ ६ ॥
काचिन्नर्तयति क्रीडामयूरं न मुदा तदा ॥ न पाठयति त कीरं पञ्जरेऽन्या कुतूहलात् ॥७॥
लालयन्नकुलं नान्या नो ह्लापयति सारिकाम् ॥ अपराऽस्तीव सम्मुग्धा नैव खेलति सारसैः ॥८॥
भेजिरे न विनोदं ताः रेमिरे नैव मन्दिरे ॥ ऊचिरे बान्धवैर्बाला वीणावाद्यं न चक्रिरे ॥९॥
कल्पद्रुमप्रसूनं यद्रसवत्तं सुधोपमम् ॥ मन्दारकुसुमामोदि न पपुर्मधरं मधु ॥१०॥ योगिन्य
इव ताः कन्या नासाग्रे न्यस्तलोचनाः अलक्ष्यध्यानसम्पन्नाः पुरुषोत्तमानसाः ॥ ११ ॥ चन्द्र-

कोई सारसों से नहीं खेलती ॥ ८ ॥ वे न तो विनोद करती थीं और न घर में क्रीड़ा करती थीं, वे न तो भाई बन्धु से बोलती थीं और न वीणा बजाती थीं ॥ ९ ॥ वे अमृत के समान रस वाले कल्पवृक्ष के फूल तथा मन्दार के फूलों को नहीं सूँघती न तो मीठी मधु पीती हैं ॥ १० ॥ वे कन्या योगिनियों की तरह नेत्रों को नाक के अगले भाग में गड़ाये अलक्ष्य ध्यान से युक्त उस दिव्य पुरुष में चित्त लगाये थीं ॥ ११ ॥ कभी तो चन्द्रकान्त मणि पर जल के

बूँद गिराती थीं। कभी क्षण भर खिड़की में बैठकर नेत्रों को इधर उधर घुमाती थीं ॥ १२ ॥ क्षण भर कमलिनी के लम्बे पत्तों की सेज बनाती थीं और कभी वे ठण्डे केले के पत्तों द्वारा सखियों से पंखा झलवाती थीं ॥ १३ ॥ इस प्रकार वे स्त्रियाँ रात्रि को युग के समान मानती हुईं, किसी तरह धैर्य धारण करके ज्वर पीड़ित के समान विह्वल हुईं

कान्तमणिच्छन्ने स्रवद्वारिकणद्रवे ॥ क्षणं वातायने स्थित्वा दोलायन्त्रे क्षणं क्षणम् ॥१२॥ रचयन्ती क्षणं शय्यां दीर्घिकाम्भोजिनीदलैः ॥ वीज्यमानाः सखीभिस्ताः शीतलैः कदलीदलैः ॥१३॥ इत्थं युगसमां रात्रिमनयंस्ता वरस्त्रियः ॥ कथञ्चिद्धीरतां कृत्वा विह्वलाः सज्वरा इव ॥१४॥ प्रातर्व्योममणिं दृष्ट्वा मन्यमानाः स्वजीवितम् ॥ विज्ञाप्य मातरं स्वां स्वां गौरीं पूजयितुं गताः ॥१५॥ स्नात्वा तेन विधानेन पुष्पैर्धूपैस्तथा पुनः ॥ विधाय पूजनं देव्या गायन्त्यस्तत्र ताः स्थिताः ॥१६॥ एतस्मिन्नन्तरे विप्रस्नातुं सोऽपि समागतः ॥ पितुराश्रमतस्तस्मादच्छोदे वै सरोवरे ॥१७॥ दृष्ट्वा दृष्ट्वेति च पुनरित्यूचुस्ताश्च कन्यकाः ॥ मित्रं

॥ १४ ॥ प्रातःकाल सूर्य नारायण को देख कर अपने को जीवित मानती हुईं अपनी अपनी माताओं से कह कर वे गौरी की पूजा करने को गईं ॥ १५ ॥ उसी विधि से स्नान करके पुष्प तथा धूप से (गौरी) पूजन करके ये देवियाँ वहीं पर गाने लगीं ॥ १६ ॥ इस बीच में वह ब्राह्मण भी स्नान करने के लिये अपने पिता के आश्रम से उस

अच्छोद सरोवर पर आया ॥ १७ ॥ उसको देखकर उन कन्याओं ने वारम्वार 'वाह वाह' किया, जैसे कमलिनी रात्रि के अन्त में सूर्य को देखकर कहती हैं ॥ १८ ॥ उस ब्रह्मचारी को देखकर उनके नेत्र खिल उठे, तब वे कन्या उस ब्रह्मचारी के समीप गईं ॥१९ ॥ और एक ने एक दूसरे का हाथ पकड़ कर चारों ओर से भुजपाश में उसको बाँध लिया

दृष्ट्वैव रात्र्यन्ते नलिन्य इव कन्यकाः ॥१८॥ उत्फुल्लनयना जातास्तं दृष्ट्वा ब्रह्मचारिणम् ॥ गत्वा तदैव ताः कन्याः समीपं ब्रह्मचारिणः ॥ १९ ॥ सव्यापसव्यवंधेन भुजपाशं च चक्रिरे ॥ गतोऽसि धूर्त पूर्वेद्युर्गन्तुमद्य न लभ्यते ॥२०॥ वृतस्त्वं नूनमस्माभिर्नात्र तेऽस्ति विचारणा ॥ इत्युक्तो ब्राह्मणः प्राह प्रहसन् बाहुपाशगः ॥२१॥ युष्माभिरुच्यते भद्रमनुकूलं प्रियं वचः ॥ प्रथमाश्रमनिष्ठस्य किन्तु नाद्यापि मे व्रतम् ॥ २२ ॥ वेदाभ्यसनशीलस्य पारं याति गुरोः कुले ॥ आश्रमे यत्र यो धर्मो रक्षणीयः स पण्डितैः ॥२३॥ विवाहोऽयमतो मन्ये

और कहने लगीं कि हे धूर्त ! उस दिन तो भाग गया था परन्तु आज नहीं भाग सकता ॥ २० ॥ हम लोगों ने तुमको वर लिया है, अब इनमें तुमको कुछ विचार न करना चाहिए, ऐसा कहने पर वहुपाश से वँधे हुए ब्राह्मण ने हँस कर कहा ॥ २१ ॥ तुम लोगों ने कल्याण के प्रिय तथा अनुकूल वचन कहा है, परन्तु मैं प्रथम आश्रम अर्थात् विद्याभ्यास में स्थित हूँ और अभी मेरा व्रत ॥ २२ ॥ गुरुकूल में वेदाभ्यास करते हुए समाप्त नहीं हुआ है. पंडितों को चाहिये

कि जिस आश्रम में रहें उसके धर्म की रक्षा करें ॥ २३ ॥ हे कन्याओं ! मैं इस आश्रम में विवाह करना धर्म नहीं समझता; उसके वाक्य को सुन कर वे कन्यायें उससे इस प्रकार बोलीं ॥ २४ ॥ जैसे वैशाख मास में पूरी ध्वनि से उत्साह सहित कोयल बोलती है, धर्म से अर्थ, अर्थ से काम तथा काम से धर्म के फल का उदय होता है ॥२५॥ ऐसा ही

न धर्म इति कन्यकाः ॥ आकर्ण्य तस्य वाक्यानि तमूचुस्ता वचस्ततः ॥२४॥ सकलध्वनि सोत्कण्ठाः कोकिला इव माधवे ॥ धर्मादर्थोऽर्थतः कामः कामाद्धर्मफलोदयः ॥२५॥ इत्येवं निश्चितं शास्त्रं वर्णयन्ति विपश्चितः ॥ सकामा धर्मबाहुल्यात् पुरस्ते समुपस्थितः ॥२६॥ सेव्यतां विविधैर्भोगैः स्वर्गभूमिरियं ततः ॥ श्रुत्वा तद्वचनं तासां प्राह गम्भीरया गिरा ॥२७॥ तथ्यं वो वचनं किन्तु समाप्याहं स्वक व्रतम् ॥ प्राप्याऽनुज्ञां गुरोः कुर्वे वैवाहं कम नान्यथा ॥२८॥ इत्युक्त्वा पुनरूचुस्ताः स्फुटं मूढोऽसि सुन्दर ॥ दिव्यौषधं ब्रह्मधियो रसायनं सिद्धि-

शास्त्र में निश्चित किया गया है और पण्डित लोग भी ऐसाही वर्णन करते हैं, हम लोग काम सहित धर्म की अधिकता से तुम्हारे पास आई हैं ॥ २६ ॥ नाना प्रकार के भोगों से इस स्वर्ग भूमि का भोग करो, तब इनके वचन को सुनकर गम्भीर वाणी से उसने कहा ॥ २७ ॥ तुम लोगों का कहना सत्य है परन्तु मैं अपना व्रत समाप्त करके तथा गुरुजी की आज्ञा प्राप्त करके विवाह की क्रिया करूँगा, अन्यथा न करूँगा ॥ २८ ॥ उसके इस प्रकार कहने पर उन कन्याओं

ने स्पष्ट रूप से कहा—हे सुन्दर ! तुम मूर्ख हो, दिव्य औषधि, ब्रह्म बुद्धि, रसायन, सिद्धि, अच्छे कुल की सुन्दर स्त्रियाँ, मन्त्र तथा सिद्ध रस—इन पदार्थों के आने पर बुद्धिमान को धर्मरूप से इनका निषेध न करना चाहिये ॥ २९ ॥ भाग्य से यदि कार्य की सिद्धि हो जाये तो नीति जानने वाले इनकी उपेक्षा नहीं करते, क्योंकि उपेक्षा फल देने वाली नहीं

निधिः साधुकुला वराङ्गनाः ॥ मन्त्रस्तथा सिद्धरसश्च धर्मतो नेमा निषेध्याः सुधिया समागताः ॥२९॥ कार्यं हि दैवाद्यदि सिद्धिमागतं तस्मिन्नुपेक्षां न च याति नीतिगः ॥ यस्मादुपेक्षा न पुनः फलप्रदा तस्मान्न दीर्घीकरणं प्रशस्यते ॥ ३० ॥ सान्द्रानुरागाः कुलजन्मनिर्मलाः स्नेहार्द्रचित्ताः सुगिरः स्वयंवरा ॥ कन्याः सुरूपाः खलु चारुयौवना धन्या लभन्तेऽत्र नरास्तु नेतरे ॥३१॥ क्व वयं सुरसुन्दर्यः क्व भवांस्तापसो बटुः ॥ दुर्घटस्य विधाने हि मन्ये धाताऽतिपण्डितः ॥३२॥ तस्मादस्मानिदानीं तु स्वीकुर्यान्मङ्गलं भवान् ॥ गान्धर्वेण विवाहेन

होती (इसी से किसी कार्य के) टालने में प्रशंसा नहीं होती ॥ ३० ॥ केवल भाग्यवान् पुरुष ही प्रेम से पूर्ण, निर्मल कुल में उत्पन्न, स्नेह से युक्त, मीठी बोलने वालीं, स्वयंवर चाहने वालीं, सुरूप, युवा तथा मनोहर कन्याओं को प्राप्त करते हैं—दूसरे नहीं ॥ ३१ ॥ कहाँ हम अद्वितीय सुन्दरियाँ, कहाँ आप तपस्वी बालक, हम जानते हैं कि बेमेल के मिलाने में विधाता अवश्य चतुर है ॥ ३२ ॥ अतएव आप इस समय हम लोगों के मंगल को गन्धर्व विवाह से स्वीकार कीजिये

नहीं तो हम लोग जीवित न रहेंगी ॥ ३३ ॥ उनके इस वाक्य को सुन कर उस धर्म जानने वालों में श्रेष्ठ ब्राह्मण ने कहा—हे मृग नयनियों ! धर्म परायण मनुष्य अपने धर्म को कैसे त्याग सकते हैं ॥ ३४ ॥ धर्म, अर्थ, काम तथा मोक्ष ये चारों विधिपूर्वक सफल होते हैं, और विपरीत होने से निष्फल होते हैं ॥३५॥ मैं व्रती रहकर विना योग्य समय

ह्यन्यथा नो न जीवितम् ॥३३॥ श्रुते वाक्ये ततः प्राह ब्राह्मणो धर्मवित्तमः ॥ भो मृगाक्ष्यः कथं त्याज्यो धर्मो धर्मपरैर्नरैः ॥३४॥ धर्मश्चार्थश्च कामश्च मोक्षश्चैव चतुष्टयम् ॥ यथोक्तं सफलं ज्ञेयं विपरीतं तु निष्फलम् ॥३५॥ नाकालेऽहं व्रती कुर्यां ततो दारपरिग्रहम् ॥ न क्रिया फलमाप्नोति क्रियाकाल न वेत्तियः ॥३६॥ यतो धर्मविचारेऽस्मिन् प्रसक्तं मम मानसम् ॥ तस्माच्छृणुत भो कन्या न समीहे स्वयंवरम् ॥३७॥ एवं ज्ञात्वाऽऽशयं तस्य समीक्ष्यैताः परस्पस्म् ॥ करात्करं विमुच्याथ जग्राहांघ्री प्रमोहिनी ॥ ३८ ॥ भुजौ जगृहतुस्तस्य

के विवाह न करूँगा, जो मनुष्य क्रिया के काल को नहीं जानता उसकी क्रिया फल को प्राप्त नहीं होती ॥ ३६ ॥ हे कन्याओं ! सुनो, मेरा चित्त इस समय धर्म के विचार में लगा है, अतएव मैं स्वयंवर की इच्छा नहीं करता ॥ ३७ ॥ इस प्रकास उसके आशय को जान कर इन्होंने परस्पर देख कर तथा हाथ छोड़कर इन मोहिनियों ने उसके चरण पकड़ लिये ॥ ३८ ॥ सुशीला तथा सुस्वरा ने इसकी भुजाओं को पकड़ा, सुतारा ने आलिङ्गन किया और चन्द्रिका

ने मुख चूम लिया ॥ ३९ ॥ तब भी प्रलय की अग्नि के समान यह ब्रह्मचारी निर्विकार अर्थात् काम की भावना से रहित था, उसने क्रोध से मूर्च्छित होकर इनको शाप दिया ॥ ४० ॥ तुम लोग डाइन की तरह मेरे शरीर में लिपटी हो, तो तुम पिशाचिनी हो जाओ, उससे जल्दी से ऐसा शाप दिये जाने पर वे उसको छोड़कर सामने खड़ी हो गईं

सुशीला सुस्वरा तथा ॥ आलिलिङ्ग सुतारा च चचुम्बे चन्द्रिका मुखम् ॥३९॥ तथापि निर्विकारोऽसौ प्रलयानलसन्निभः ॥ शशाप ब्रह्मचारी ताः क्रोधेनात्यन्तमूर्छितः ॥४०॥ पिशाच्य इव मां लग्नास्तत्पिशाच्यो भविष्यथ ॥ एवं तेनाशु शप्तास्तास्तं त्यक्त्वा पुरतः स्थिताः ॥४१॥ किमेतच्चेष्टितं पाप ह्यनागसि जने त्वया ॥ प्रिये कृत्येऽप्रियं कृत्वा धिक्तां धर्मज्ञतां तव ॥४२॥ अनुरक्तेषु भक्तेषु मित्रेषु द्रोहकारिणः ॥ पुंसां लोकद्वये सौख्यं नाशमेतीति न श्रुतम् ॥४३॥ तस्मात्त्वमपि नः शापात्पिशाचो भव सत्वरम् ॥ इति कोपरता बाला निश्वसन्त्यः क्षुधाकुलाः॥४४॥

॥४१॥ (और कहने लगीं) हम लोगों ने क्या पाप किया जो तुमने मुझ निरपराधियों को शाप दे दिया, प्रिय करने में अप्रिय क्रिया की, तुम्हारी धर्मज्ञता को धिक्कार है ॥ ४२ ॥ हम लोगों ने सुना है कि प्रेमियों से, भक्तों से तथा मित्रों से द्रोह करने वाले मनुष्यों को सुख दोनों लोक में नष्ट होते हैं ॥ ४३ ॥ अतएव तुम भी हम लोगों के शाप से शीघ्र ही पिशाच हो जाओ, इस प्रकार क्रोध से व्यग्र कन्यायें हाँफती हुईं भूख से व्याकुल हो गईं ॥ ४४ ॥ तब हे राजन् !

परस्पर के क्रोध से उस सरोवर पर वे कन्यायें और वह ब्रह्मचारी सब पिशाच पिशाचिनी हो गये ॥ ४५ ॥ और पिशाच पिशाचिनी दारुण शब्द में चिल्लाते हुए अपने पहिले पाप के कर्म के फल को भोगने लगे ॥४६॥ हे राजन् ! पूर्व जन्म के किये हुए शुभ तथा अशुभ कार्य अपनी छाया के समान अपने काल ही में प्रकट होते हैं, इनको देवता भी बदल नहीं

तदैवान्योऽन्यसंरम्भात्तस्मिन् सरसि पार्थिव ॥ ताः कन्या ब्रह्मचारी च सर्वे पैशाच्यमागताः ॥४५॥ पिशाच्यः स पिशाचश्च क्रन्दमानाः सुदारुणम् ॥ क्षपयन्ति विपाकं तं पूर्वोपात्तस्य कर्मणः ॥४६॥ स्वकाले प्रभवत्येव पूर्वोपात्तं शुभाशुभम् ॥ स्वच्छायमिव दुर्वारं देवानामपि पार्थिव ॥४७॥ क्रन्दन्ति पितरस्तासां मातरस्तस्य तत्र च ॥ आः प्रमादो हि बालानां दैवं हि दुरतिक्रमम् ॥४८॥ तत्र ऊर्ध्वं पिशाचास्ते अहोरात्रं सदुःखिताः ॥ इतश्चेतश्च धावन्तो वसन्ति सरसस्तटे ॥४९॥ एवं बहुतिथे काले लोमशो मुनिसत्तमः ॥ पौषशुक्लचतुर्दश्यां अच्छोदे स्नातुमाययौ ॥५०॥ तं दृष्ट्वा ब्राह्मणं सर्वे पिशाचाः क्षुत्समाकुलाः ॥ धावन्तो

सकते ॥ ४७ ॥ वहाँ पर इनके माता पिता (आकर) रोने लगे और कहने लगे वाह रे बालकों का प्रमाद ! दैव गति का उल्लंघन नहीं हो सकता ॥ ४८ ॥ इसके बाद ये पिशाच रात दिन दुःखी रहते हुए सरोवर के तट पर इधर उधर घूमते रहते थे ॥ ४९ ॥ इस प्रकार (रहते हुए) बहुत दिन के बाद मुनियों में श्रेष्ठ लोमशजी पौष शुक्ल चतुर्दशी को अच्छोद सरोवर पर स्नान करने आये ॥ ५० ॥ क्षुधा से व्याकुल पिशाचों ने इनको देखा, उनकी हत्या करने के लिए

ये सब लोग गोल बाँध कर उनकी ओर दौड़े ॥ ५१ ॥ परन्तु वे लोमश ऋषि के तेज से जलने लगे और उनके सम्मुख खड़े न रह सके, दूर हट गये ॥ ५२ ॥ वेदनिधि ब्राह्मण भी वहाँ पर आ गये, हे राजन् ! उन्होंने लोमश ऋषि को देख कर साष्टाङ्ग प्रणाम किया ॥ ५३ ॥ और मस्तक पर अञ्जलि को बाँध कर मनोहर वचन कहने लगे।

हन्तुकामाश्च मिलिता यूथवर्तिनः ॥ ५१ ॥ दह्यमानाः सुतीव्रेण तेजसा लोमशस्य च ॥ असमर्थाः पुरः स्थातुं सर्वे ते दूरतः स्थिताः ॥ ५२ ॥ तत्र वेदनिधिर्विप्रस्तदैव हि समागतः ॥ समीक्ष्य लोमशं राजन् साष्टाङ्गं प्रणिपत्य सः ॥ ५३ ॥ उवाच सूनृतां वाचं बद्ध्वा शिरसि चाञ्जलिम् ॥ वेदनिधिरुवाच—महाभाग्यवशाद्विप्र साधूनां सङ्गमो भवेत् ॥ ५४ ॥ गङ्गादिपुण्यतीर्थेषु यो नरः स्नाति सर्वदा ॥ यः करोति सतां सङ्गं तयोः सत्सङ्गमो वरः ॥५५॥ गुरूणां सङ्गमो विप्र दृष्टादृष्टफलो भुवि ॥ स्वर्गदो रोगहारी च किन्तु स्यात् साधुसङ्गमः ॥ ५६ ॥ वसिष्ठ उवाच—इत्युक्त्वा कथयामास पूर्ववृत्तान्तमद्भुतम् ॥ इमा गन्धर्व-

वेदनिधिजी ने कहा—बड़े भाग्य से साधुओं का संगम होता है ॥ ५४ ॥ जो मनुष्य गङ्गा इत्यादि तीर्थों में सर्वदा स्नान करता है और जो सज्जनों का सङ्ग करता है, इन दोनों प्रकार के मनुष्यों में सत्सङ्ग करनेवाला श्रेष्ठ होता है ॥५५॥ हे विप्र ! संसार में गुरुजनों का संगम दृष्ट तथा अदृष्ट फल को देता है, परन्तु साधुजन का संगम स्वर्ग को देता है तथा

रोगों को हरण करता है ॥ ५६ ॥ वसिष्ठजी ने कहा—ऐसा कह कर प्राचीन अद्भुत वृत्तान्त वर्णन करने लगे कि ये गन्धर्व की कन्यायें हैं और यह मुनि मेरा पुत्र है ॥५७॥ सभी शाप से विमोहित होकर, हे मुनिश्रेष्ठ ! मुख नीचा किये आपके सामने खड़े हैं ॥ ५८ ॥ आपके दर्शन से आज बालकों का निस्तार होगा, जिस प्रकार सूर्य के उदय होने पर

कन्यास्ता मुने सोऽयं ममात्मजः ॥५७॥ सर्वे पिशाचरूपेण मिथः शापविमोहिताः ॥ दीनानास्तु तिष्ठन्ति तवाग्रे मुनिसत्तम ॥५८॥ त्वद्दर्शनेन बालानां निस्तारोऽद्य भविष्यति ॥ सूर्योदये तमःस्तोमः किन्न लीयेत गह्वरे ॥५९॥ श्रुत्वैतल्लोमशो राजन् कृपार्द्रीकृतलोचनः ॥ प्रत्युवाच महातेजास्तं मुनिं पुत्रदुःखितम् ॥ ६० ॥ लोमश उवाच—मत्प्रसादाच्च बालानां स्मृतिः सपदि जायताम् ॥ धर्मं च वच्मि तं येन मिथः शापो लय व्रजेत् ॥ ६१ ॥

इति श्रीपद्मपुराणे माघमाहात्म्ये वसिष्ठदिलीपसंवादे गन्धर्वकन्याशापवर्णनं नामोनविंशोऽध्यायः॥१९॥

अन्धकार का पुञ्ज गुफा में लीन होता है ॥ ५९ ॥ हे राजन् ! ऐसा सुनते ही लोमश ऋषि के आँखों में जल भर आया और उस पुत्रदुःखी महातेजस्वी ऋषि से कहने लगे ॥ ६० ॥ लोमशजी ने कहा—मेरे प्रसाद से बालकों को शीघ्र स्मृति उत्पन्न हो, मैं उनको धर्म कहता हूँ जिससे इनका परस्पर का शाप नष्ट हो जायगा ॥ ६१ ॥

श्री पद्मपुराण के माघमहात्म्य में वशिष्ठ और दीलिप के संवाद में गन्धर्व कन्या के शाप का वर्णन नामक उन्नीसवाँ अध्याय समाप्त हुआ ॥ १९ ॥

वेदनिधिजी ने कहा—हे महर्षि ! धर्म को कहिये जिससे ये बालक मुक्त हों, विलम्ब करने का समय नहीं है क्योंकि शाप की अग्नि बड़ी कष्ट कारक है ॥ १ ॥ लोमशजी ने कहा—ये लोग मेरे साथ विधि पूर्वक माघ स्नान करें, माघ के अन्त में ये शाप से मुक्त होंगे, अन्यथा इनका निस्तार न होगा ॥ २ ॥ हे विप्र ! मुझे यह पूर्ण निश्चय है कि शुभ

वेदनिधिरुवाच—महर्षे कथ्यतां धर्मो मुच्येरन्येन बालकाः ॥ नायं कालो विलम्बस्य शापाग्निर्दारुणा यतः ॥१॥ लोमश उवाच—सार्धं मया प्रकुर्वन्तु माघस्नानं विधानतः ॥ शापं मोक्ष्यन्ति माघान्ते नान्यथा निष्कृतिर्भवेत् ॥२॥ शापः पापफलं विप्र पापनाशो भवेन्नृणाम् ॥ माघस्नानेन सत्तीर्थे इति नो निश्चिता मतिः ॥३॥ सप्तजन्मकृतं पापं वर्तमानं च पातकम् ॥ माघस्नानं दहेत् सर्वं पुण्यतीर्थे विशेषतः ॥४॥ प्रायश्चित्तं न पश्यन्तियस्मिन् पापे मुनीश्वराः ॥ माघस्नानं परं तीर्थे प्रायश्चित्तं समीरितम् ॥५॥ पातकं पुण्यतीर्थेषु नश्येत्तदपि

तीर्थ में माघ स्नान करने से ही मनुष्यों के पाप रूपी शाप का फल नाश होता है ॥ ३ ॥ सात जन्म का किया हुआ पाप तथा वर्तमान जन्म का पाप सभी माघ स्नान से भस्म हो जाता है, विशेष कर पुण्य तीर्थ में स्नान करने से ॥ ४ ॥ मुनीश्वर लोग जिस पाप का प्रायश्चित्त नहीं देखते उसका प्रायश्चित्त श्रेष्ठ तीर्थ में माघ स्नान ही बतलाते हैं ॥ ५ ॥ पुण्य तीर्थों में पाप नष्ट होते हैं तब भी माघ मास में ज्ञान पूर्वक मानसरोवर में स्नान करने से मोक्ष का फल प्राप्त

होता है ॥ ६ ॥ हिमालय पर्वत पर के तीर्थ सब पापों को नाश करने वाले हैं, परन्तु अच्छोद में स्नान करने से इन्द्रलोक प्राप्त होता है; वेद पारंगत ब्राह्मणों ने कहा है कि ॥ ७ ॥ बदरी वन में माघ स्नान करना सब काम को देने वाला, मोक्ष को देने वाला, पाप तथा दुःखों को हरने वाला और सब फलों को देने वाला होता है ॥ ८ ॥

माघतः ॥ ज्ञानकृन्मानसे माघस्तस्मान्मोक्षफलप्रदः ॥६॥ हिमवत्पृष्ठतीर्थेषु सर्वपापप्रणाशनः ॥ इन्द्रलोकप्रदोऽच्छोदे निर्दिष्टो वेदपारगः ॥७॥ सर्वकामप्रदो माघो मोक्षदो बदरीवने ॥ पापहा दुःखहारी च सर्वकामफलप्रदः ॥८॥ रुद्रलोकप्रदो माघो नार्मदः पापनाशनः ॥ यामुनः सूर्यलोकाय तथा कल्मषघातकः ॥९॥ सारस्वतोऽघविध्वंसी ब्रह्मलोकफलस्तथा ॥ विशालफलदो माघो विशालायां द्विजोत्तम ॥१०॥ पापेन्धनस्य दावाग्निर्गर्भहेतुक्रियापहः ॥ विष्णुलोकाय मोक्षाय जाह्नव्यां परिकीर्तितः ॥ ११ ॥ सरयू गण्डकी सिन्धुश्चन्द्रभागा च कौशिकी ॥

नमदा नदी का माघ स्नान पाप नाश करने वाला तथा रुद्रलोक देने वाला होता है, तथा यमुना में का स्नान पाप को हटाता है और इससे सूर्यलोक प्राप्त होता है ॥ ९ ॥ सरस्वती नदी का जल पाप को नाश करने वाला तथा ब्रह्मलोक के फल को देने वाला है, हे द्विजश्रेष्ठ ! विशाला नदी में माघ स्नान का बड़ा फल होता है ॥ १० ॥ यह पाप रूपी इन्धन का दावानल है। तथा गर्भ के कारण-भूत कर्मों का नाश करता हैं, गंगाजी में स्नान करने से

विष्णु लोक की प्राप्ति और मोक्ष का होना प्रसिद्ध है ॥ ११ ॥ सरयू, गण्डकी, सिन्धु, चन्द्रभागा, कौशिकी, तापी, गोदावरी, भीमा, पयोष्णी, कृष्णा, वेणी ॥ १२ ॥ कावेरी, तुङ्गभद्रा तथा अन्य समुद्र में गिरने वाली नदियों में माघ-मास में स्नान करने से मनुष्य पाप रहित होकर स्वर्ग में जाता है ॥ १३ ॥ नैमिषारण्य में स्नान करने से विष्णु

तापी गादावरी भीमा पयोष्णी कृष्णवेणिका ॥ १२ ॥ कावेरी तुङ्गभद्रा च अन्या याश्च समुद्रगाः ॥ स्नात्वा माघे नरो याति स्वर्गलोकं विकल्मषः ॥ १३ ॥ नैमिषे विष्णुसारूप्यं पुष्करे ब्रह्मणोऽन्तिकम् ॥ आखण्डलस्य लोको हि कुरुक्षेत्रे तु माघतः ॥१४॥ माघो देव-ह्रदे विप्र योगसिद्धिफलप्रदः ॥ प्रभासे मकरादित्ये स्नानाद्रुद्रगणो भवेत् ॥ १५ ॥ माघात् पृथूदके विप्र प्राप्यते वैष्णवं पदम् ॥ देवक्यां देवतादेहो नरो भवति माघतः ॥१६॥ माघस्नानेन भो विप्र गोमत्यां न पुनर्भवः ॥ हेमकूटे महाकाले ॐकारेऽमरकण्टके

भगवान् की समानरूपता, पुष्कर में ब्रह्मा का सामीप्य, तथा कुरुक्षेत्र में माघ मास में स्नान करने से इन्द्रलोक प्राप्त होता है ॥ १४ ॥ हे विप्र ! देवह्रद में माघ स्नान करने से योग सिद्धि का फल होता है ॥१५॥ मकर के सूर्य में प्रभास तीर्थ में स्नान करने से रुद्रगण होता है, हे विप्र ! पृथूदक में माघ स्नान करने से वैष्णव पद प्राप्त होता है, देवकी में माघ स्नान करने से मनुष्य देवता का शरीर प्राप्त करता है ॥ १६ ॥ हे विप्र ! गोमती में माघ स्नान करने से पुनर्जन्म

नहीं होता; हेमकूट, महाकाल, ओंकारेश्वर तथा अमरकण्टक में ॥ १७ ॥ नीलकण्टक तथा अर्बुद में माघ स्नान करने से रुद्रलोक प्राप्त होता है, हे विप्र ! मकर की संक्रान्ति के सूर्य में सब नदियों में ॥ १८ ॥ स्नान करने से मनुष्यों की सब कामना पूर्ण होती है, हे द्विजश्रेष्ठ ! प्रयाग में माघ स्नान बड़े भाग्य से प्राप्त होता है ॥ १९ ॥ क्योंकि

॥१७॥ नीलकण्ठेऽर्बुदे माघो रुद्रलोके महीयते ॥ सर्वासां सरितां विप्र सम्भेदे मकरे रवौ ॥१८॥ स्नानेन सर्वकामानामवाप्तिर्जायते नृणाम् ॥ माघस्तु प्राप्यते धन्यैः प्रयागे द्विजसत्तम ॥१९॥ अपुनर्भवदं तत्र सितासितजलं यतः ॥ गायन्ति देवाः सततं दिवि स्थिता माघः प्रयागे किल नो भविष्यति ॥२०॥ स्नात्वा नरा यत्र न गर्भवेदतां पश्यन्ति तिष्ठन्ति च विष्णुसन्निधौ ॥ मज्जन्ति ये द्वित्र्यहमत्र मानवास्तीर्थे प्रयागे बहुपापकश्चुकाः ॥ २१ ॥ व्रजन्ति ते नो निरयेषु धर्मवित् स्वर्गेषु ते चारु चरन्ति देववत् ॥ तीर्थैर्व्रतैर्दानतपो-

वहाँ का सफेद और काला जल मोक्ष को देने वाला है। स्वर्ग में देवता लोग निरन्तर गायन करते हैं कि हम लोगों का स्नान माघ मास में प्रयाग में अवश्य होगा ॥ २० ॥ जहाँ पर स्नान करके गर्भ की वेदना को मनुष्य नहीं देखते तथा विष्णु के समीप रहते हैं, अनेक पाप किये हुये भी जो मनुष्य दो तीन दिन भी प्रयाग तीर्थ में स्नान करते हैं॥२१॥ वे धर्मवेत्ता लोग नरक में नहीं जाते परन्तु स्वर्ग में देवता की तरह विचरते हैं, प्राचीन समय में विधाता ने तीर्थ, व्रत, दान, तप और यज्ञ को तराजू के एक पलरे में रक्खा । २२॥ तथा दूसरे पलरे में प्रयाग को माघ स्नान रक्खा तब

माघ स्नान ही श्रेष्ठ होने से भारी निकला, वायु, जल, पत्ती खाना इत्यादि शरीर सुखाने वाले उग्र तपों से चिरकाल में सञ्चित किए हुए ॥ २३ ॥ योगों से जो गति मनुष्य प्राप्त नहीं करता है वह गति मनुष्य प्रयाग में माघ मास में स्नान करने से प्राप्त करता हैं, जो मकर संक्रान्ति में सूर्योदय में गंगा यमुना के संगम में प्रयाग में नही स्नान करते ॥ २ ॥४

भिरध्वरैः सार्धं विधात्रा तुलया धृतः पुरा ॥ २२ ॥ माघः प्रयागस्य तयोर्द्वयोरभून्माघो गरीयानत एव सोऽधिकः ॥ वाताम्बुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसञ्चितैः ॥२३॥ योगैश्च संयान्ति नरा न तां गतिं स्नानात् प्रयागस्य हि यान्ति यां गतिम् ॥ स्नाता न ये माकरभास्करोदये तीर्थे प्रयागे सुरसिन्धुसङ्गमे ॥ २४ ॥ तेषां गृहद्वारमलं करोति किं भृङ्गावली कुञ्जरकर्णताडिता ॥ यो राजसूयाद्धयमेधयज्ञतः स्नानात् फलं सम्प्रददाति चाधिकम् ॥ २५ ॥ पापानि सर्वाणि विलोप्य लीलया नूनं प्रयागः स कथं न सेव्यते ॥ २६ ॥

इति श्रीपद्मपुराणे उत्तरखण्डे माघमासमाहात्म्ये विंशोऽध्यायः ॥ २० ॥

क्या उनके घर के द्वार को हाथी के कानों से उड़ाये हुए भौरों के समुदाय अलंकृत करते हैं (अर्थात् ऐसे मनुष्य धनवान् नहीं हो सकते) राजसूय और अश्वमेध के फल से ही बढ़कर फल माघ स्नान से होता है ॥ २५ ॥ अतएव सब पापों को सहज में हटाने वाला उस प्रयाग स्नान का क्यों न सेवन किया जाय ॥ २६ ॥

श्री पद्मपुराण के माघमाहात्म्य का बीसवाँ अध्याय समाप्त हुआ ॥ २० ॥

लोमशजी ने कहा—प्राचीन समय में अवन्ती देश में वीरसेन नाम का राजा था, उसने नर्मदा तीर पर जाकर राजसूय यज्ञ किया ॥ १ ॥ सुवर्ण मार्ग में विराजित सोलह अश्वमेध किये, जो विधि पूर्वक सोने के आभूषणों से तथा यज्ञ के स्तम्भों से विभूषित थे ॥ २ ॥ उस राजा ने ब्राह्मणों को पर्वत के समान अन्न के ढेर दिये,

लोमश उवाच—अवन्तीविषये राजा वीरसेनोऽभवत् पुरा ॥ नर्मदातीरमाश्रित्य राजसूयं चकार सः ॥ १ ॥ षोडशैरश्वमेधैश्च स्वर्णवाटविराजितैः ॥ स्वर्णभूषणयूपाढ्यैरीजे सोऽपि यथाविधि ॥ २ ॥ प्रददौ धान्यराशींश्च द्विजेभ्यः पर्वतोपमान् ॥ वदान्यो देवताभक्तो गोप्रदः स सुवर्णदः ॥ ३ ॥ ब्राह्मणो भद्रको नाम मूर्खो हीनकुलस्तथा ॥ कृषीवलो दुराचारः सर्वधर्मबहिष्कृतः ॥४॥ सीरकर्मसमुद्विग्नो बन्धुभिश्च समुज्झितः ॥ इतस्ततः परिभ्रम्य निर्गतो वृत्तिपीडितः ॥५॥ दैवतः सोऽयमाविश्य प्रयागं स समागतः ॥ महामाघीं पुरस्कृत्य सस्त्रौ

वह बड़ा दानी देवता का भक्त तथा सुवर्ण सहित गौ का दान करने वाला था ॥ ३ ॥ भद्रक नाम का एक ब्राह्मण था जो मूर्ख, कुलहीन, कृषिकार्य करने वाला, दुराचारी तथा धर्मत्याग किये हुए था ॥ ४ ॥ खेती के काम में लगा हुआ वह भाई-बन्धु से छोड़ा हुआ था, जीविका से पीड़ित होकर वह इधर-उधर घूमता हुआ चला गया ॥ ५ ॥

वह देवयात्रियों के साथ प्रयाग में आया और उसने मकर संक्रान्ति में माघ मास में तीन दिन स्नान किया ॥ ६ ॥ वह श्रेष्ठ ब्राह्मण स्नान मात्र से पाप रहित होकर प्रयाग से चल कर जहाँ से गया था वहीं पर आ गया ॥ ७ ॥ तब वह राजा और वह ब्राह्मण एक ही दिन मृत्यु को प्राप्त हुए; मैंने इन दोनों की इन्द्र के समीप में समान गति देखी ॥८॥

तत्र दिनत्रयम् ॥६॥ अनघः स्नानमात्रेण भूत्वेह स द्विजोत्तमः ॥ प्रयागाच्चलितस्तत्र पुनर्यस्मात् समागतः ॥७॥ स राजा सोऽपि विप्रश्च विपन्नावेकदा तदा ॥ तयोर्गतिः समा दृष्टा मया शक्रस्य सन्निधौ ॥८॥ तेजो रूपं बलं स्त्रैण देवयानं विभूषणम् ॥ पारिजातस्य माला च नृत्यं गीतं तयोः समम् ॥९॥ इति दृष्ट्वा तु माहात्म्यं क्षेत्रस्य कथमुच्यते ॥ माघः सितासिते विप्र राजसूयसमो भवेत् ॥१०॥ धनुस्त्रिंशत्तु विस्तीर्णे सितनीलाम्बुसङ्गमे ॥ अपुनरावृत्ति र्माघाच्च राजसूयी पुनर्भवेत् ॥११॥ माघमासीयवातोऽपि सितासितजलं स्पृशन् ॥ अधम्य

तेज, रूप, बल, स्त्री, देवयान, आभूषण तथा परिजात की माला में तुल्य थे और इन दोनों को सामने नृत्य और गीत होती थीं ॥ ९ ॥ ऐसा देखकर उस क्षेत्र का क्या माहात्म्य कहा जाय। हे विप्र! प्रयाग में माघ स्नान राजसूय यज्ञ के समान होता है ॥ १० ॥ श्वेत और नील अर्थात् गङ्गा यमुना के सङ्गम में तीस धनुष की लम्बान तक माघ स्नान करने से संसार में फिर जन्म नहीं होता, राजसूय यज्ञ करने वाला संसार में फिर भी जन्म लेता है ॥ ११ ॥ गङ्गा

यमुना के संगम को स्पर्श की हुई माघ मास की वायु भी अधर्म को स्पर्श नहीं करती तथा वह भी बड़े बड़े पातकों को अवश्य नाश करती है ॥१२॥ बहुत कहने से क्या, हे ब्राह्मण ! निश्चित रूप से सुनिये—किसी भी तीर्थ में किये हुये पाप का फल माघ मास में (प्रयाग में) स्नान करने से नष्ट होता है ॥ १३ ॥ यहाँ पर तुमसे पिशाचमोचन नाम का एक

न स्पृशेन्नूनं महापातकहा हि सः ॥१२॥ किमत्र बहुनोक्तेन श्रूयतां द्विज निश्चितम् ॥ समुद्भूतफलं पापं तीर्थे माघः प्रणाशयेत् ॥१३॥ अत्र ते कथयिष्यामि सावधानमतिः शृणु ॥ पिशाचमोचनं नाम इतिहासं पुरातनम् ॥१४॥ शृण्वन्त्वप्सरसो बालाः शृणोतु त्वत्सुतस्तथा ॥ मत्प्रसादात् स्मृति लब्ध्वा पैशाच्यान्मुक्तिकामिनः ॥१५॥ पुरा वेदद्युतिर्विप्रो वष्णवो वेदपारगः ॥ पिशाचं मोचयामास कृपागम्भीरसागरः ॥१६॥ वेदनिधिरुवाच—कुत्र स्थितः कस्य पुत्रो नियमः कोऽस्य चाभवत् ॥ केन वा वैष्णवो वृत्तः कः पिशाचश्च मोचितः ॥१७॥

प्राचीन इतिहास कहता हूँ, सावधान चित्त होकर सुनो ॥ १४ ॥ इसको अप्सरा की कन्यायें सुनें और तुम्हारा पुत्र भी सुने, मेरे प्रसाद से स्मृति प्राप्त करके ये पिशाचयोनि से मुक्त हो जावेंगे ॥ १५ ॥ प्रचीन समय में वेदद्युति नाम का कृपा तथा गम्भीरता के सागर वेद पारंगत एक वैष्णव था, उस ने पिशाच को निर्मुक्त किया था ॥ १६ ॥ वेदनिधिजी ने कहा—वह कहाँ का रहने वाला था ! किसका पुत्र था ? और इसका क्या नियम था ? किसने उसको वैष्णव

बनाया और किस पिशाच को उसने मुक्त किया ॥ १७ ॥ हे महामुनि ! यह सब विस्तार पूर्वक कहिये, आपके प्रसाद से इस महापुण्य को सुनने का बड़ा कौतूहल है ॥१८॥ लोमशजी ने कहा प्लक्ष से निकली हुई सुन्दर सरस्वती के तट पर पर्वत के सहारे में इसका आश्रम था ॥ १९ ॥ शाल, ताल, तमाल, बेल, बगुल, इमली, चिरबेल, आम, चंपक,

एतद्विस्तरतः सर्वं कीर्तय त्वं महामुने ॥ कौतूहलं महापुण्यं शृणुमस्त्वत्प्रसादतः ॥ १८ ॥ लोमश उवाच—प्लक्षप्रस्रवणे रम्ये सरस्वत्यास्तु निर्गमे ॥ तत्राश्रमपदं तस्य शैलमाश्रित्य शोभते ॥१९॥ शालैस्तालैस्तमालैश्च बिल्वैर्बकुलपादपैः ॥ तिन्तिणीचिरबिल्वैश्च चूतचम्पककाञ्चनैः ॥ २० ॥ करञ्जैः कोविदारैश्च केसरैः कुञ्जराशनैः ॥ तिलकैः कर्णिकारैश्च कुम्भीखदिरतिन्दुकैः ॥ २१ ॥ वानीरैः शोलुजम्बीरैः पीलूदुम्बरवेतसैः ॥ खाखोटैराटरूषश्च करहाटैर्वटद्रुमैः ॥२२॥ घोटाकुटजपालाशैरशोकैः शोकहारिभिः ॥ जम्बूनिम्बकदम्बैश्च क्षीरिकाकरमर्दकैः ॥२३॥ बीजपूरैः सनारङ्गैः रम्भाराजिविराजितैः ॥ पनसै रसवद्भिश्च नारिकेलैः

कांचन, ॥ २० ॥ करञ्ज, कोविदार, केसर, पीपल, तिलक, कर्णिकार, चुम्भी, तिन्दुक ॥ २१ ॥ वानीर, शोलु जम्बीर, पीलू, गूलर बेंत, खाखोट, आड़ू, करहाट तथा बरगद के वृक्ष ॥ २२ ॥ घोटा, कुटज, परास, अशोक, जामुन, नीम, कदम्ब, खिरनी, करौंधा ॥ २३ ॥ बीजपूर, नारङ्गी तथा केले के वृक्षों के समुदाय से सुशोभित, रस वाले नारियल,

सदाफल इत्यादि वृक्षों से पूर्ण ॥ २४ ॥ सप्तपर्ण, त्रिपर्ण, सिरिस, सुन्दर आँवला, कर्कन्धू, लकुट, परिभद्र तथा वच इत्यादि वृक्षों से ॥ २५ ॥ केतकी, शिशुमार, तगर, कुन्द, मल्लीक, कमल, नील कमल, कन्हार, मालती तथा चमेली इत्यादि से ॥ २६ ॥ हे ब्राह्मण ! इस प्रकार नाना प्रकार के वृक्षों से यह आश्रम रमणीक था; वन के मध्य में पुण्य

सदाफलैः ॥२४॥ सप्तपर्णैस्त्रिपर्णैश्च शिरीषामलकैः शुभैः ॥ कर्कन्धुलकुचैरक्षैः पारिभद्रैर्वचादिभिः ॥२५॥ केतकैः शिशुमारैश्च तगरैः कुन्दमल्लिकैः ॥ पद्मेन्दीवरकल्हारमालतीयूथिकादिभिः ॥२६॥ आश्रमो रमणीयः स द्रुमैर्नानाविधैर्द्विज ॥ मध्येवनं नदी याति पुण्यतोया सरस्वती ॥२७॥ कूजन्ति सारसास्तत्र मदस्निग्धकलं सदा ॥ नदन्ति कोकिला मत्ता गुञ्जन्ति च मधुव्रताः ॥२८॥ बहु कोलाहलं विप्र तद्वनं शुकसारिभिः ॥ चरन्ति विविधास्तस्मिन् श्वापदाः काननोत्तमे ॥२९॥ सदाफलं सदापुष्पं परागकणधूसरम् ॥ आच्छन्नं काननं सर्वं मधु-

जल वाली सरस्वती नदी बहती थी ॥ २७ ॥ वहाँ पर सारस मधुर स्वर से कूँजते थे, उन्मत्त कोयल शब्द करते थे तथा भौंरे गूँजते थे ॥ २८ ॥ हे विप्र ! सुग्गे तथा मैना का बड़ा कोलाहल रहता था, उस उत्तम वन में नाना प्रकार के पशु चरते थे ॥ २९ ॥ वह वन सर्वदा फल, फूल तथा परागकण से धूमिल रहता था, सम्पूर्ण वन मधुमक्खियों के छत्तों

से व्याप्त था ॥ ३० ॥ नये नये पत्ते तथा मंजरियों से परिपूर्ण लतायें वृक्षों में ऐसी लिपटी थीं जैसे प्रिया से आलिंगन किया हुआ वल्लभ शोभित होता है ॥ ३१ ॥ उस (ब्राह्मण) के शाप से भय से वहाँ पर वायु भी मन्द चलती थी, मेघ पत्थर-पाला नहीं बरसाते थे तथा सूर्य (जल वनस्पति इत्यादि को) नहीं सुखाता था ॥ ३२ ॥ बिना उपद्रव के

च्छत्रैः समन्ततः॥३०॥नवपल्लवसञ्जातमञ्जरीवरवल्लिभिः॥आश्लिष्टमभितो रम्य प्रियाभिरिव वल्लभम् ॥३१॥ तस्य शापभयात्तत्र वातो वाति समन्ततः ॥ न वर्षन्त्यश्मभिर्मेघा न शोषयति भास्करः ॥३२॥ वनं सोपद्रवं तन्न सदा सिद्धनिषेवितम् ॥ आह्लादजननं नित्यं वनं चैत्ररथं यथा ॥३३॥ तस्मिन् वसति धर्मात्मा देवद्युतिर्द्विजोत्तमः ॥ पुत्रः सुमित्रविप्रस्य लब्धो लक्ष्मीवराद्द्विजः ॥३४॥ नियमः श्रूयतां तस्य सर्वदा नियतात्मनः ॥ ग्रीष्मे पञ्चतपा नित्यं रवौ न्यस्तविलोचनः ॥३५॥ वर्षत्कादम्बिनीजालवर्षास्वभ्रावकाशकः ॥ वाते प्रवाति निष्कम्पो दुःसहे

इस वन में सिद्ध लोग सर्वदा रहते थे, और यह वन चैत्ररथ-वन के सदृश आनन्द देने वाला था ॥ ३३ ॥ इसी में द्विजश्रेष्ठ धर्मात्मा देवद्युति रहता था, वह सुमित्र ब्राह्मण का पुत्र था जो लक्ष्मी के वर से उत्पन्न हुआ था ॥ ३४ ॥ अब इसके नियम को सुनो, यह सर्वदा आत्मा को स्थिर किये रहता था, गर्मी के दिनों में नित्य अपने नेत्र सूर्य की ओर रखता था ॥ ३५ ॥ वर्षा काल में खुले मैदान में बैठ कर तपस्या करता था, दुःसह वायु चलने पर हिमाचल पर्वत

की तरह निष्कम्प रहता था ॥ ३६ ॥ वह ब्राह्मण हेमन्त ऋतु में सारस्वत सरोवर में बैठता था और निर्मल जल का स्पर्श करके त्रिकाल सन्ध्योपासन करता था ॥ ३७ ॥ पितर, देव तथा ऋषियों की श्रद्धा पूर्वक नित्य तर्पण करता था, अग्नि में श्रद्धा से होम करता था, अतिथि की पूजा करता था ॥३८॥ चान्द्रायण व्रत की विधि से वह सर्वदा काल विताता

हिमवानिव ॥३६॥ स वसत्यप्सु हेमन्ते ह्रदे सारस्वते द्विजः ॥ उपस्पृशति काले स त्रिवारं वारि निर्मलम् ॥३७॥ पितॄन् देवान् ऋषीन्नित्यं सन्पयति श्रद्धया ॥ वह्नौ जुहोति वैताने श्रद्धयाऽतिथिपूजकः ॥३८॥ चान्द्रायणविधानेन कालं नयति सर्वदा ॥ ब्रह्मयज्ञपरो नित्यं सत्यवादी जितेन्द्रियः ॥३९॥ भ्रमन् विश्राम्यति श्रान्तः सदैव प्रार्थयन् हरिम् ॥ स्वयं विगलीतः पुष्पैः फलैर्वृत्तिं समीहते ॥४०॥ अनुद्विग्नस्तपोनिष्ठो वेदवेदाङ्गपारगः धमनीभिः करालोऽसावस्थिमात्रकलेवरः ॥४१॥ इत्थं जगाम वर्षाणां सहस्रं तस्य तद्वने ॥ तदा जज्वाल

था, प्रतिदिन ब्रह्मयज्ञ करता था, सत्यवादी और जितेन्द्रिय था ॥ ३९ ॥ घूमते-घूमते थक कर विश्राम करता था और भगवान् हरि को भजता था। आपसे आप गिरे हुए फल और पत्तियों का आहार करता था ॥ ४० ॥ विना किसी प्रकार से उद्विग्न हुए, तपोनिष्ठ, वेद वेदाङ्गों में पारंगत इस ब्राह्मण की केवल नाड़ियाँ देख पड़ती थीं और इसके शरीर में केवल अस्थि मात्र बच गई थी ॥ ४१ ॥ इस प्रकार उसको इस वन में हजार वर्ष बीत गये, तब उसके तप के

तेज से यह पर्वत प्रज्वलित हो उठा ॥ ४२ ॥ उस महात्मा के तेज को कोई प्राणी सह न सकता था, वह ब्राह्मण तप के प्रभाव से अग्नि के समान देदीप्यमान देख पड़ता था ॥ ४३ ॥ उस वन में शत्रुता त्याग कर सब प्राणी रहते थे, मृग व्याघ्र, चूहे, बिल्ली सभी निर्भय होकर एक साथ खेलते थे ॥ ४४ ॥ दूसरे से भी अति दुर्लभ नियम को सुनो, वह नित्य

शैलोऽसौ तपसा तस्य तेजसा ॥४२॥ सोढुं न शक्यते भूतैस्तेजस्तस्य महात्मनः ॥ वैश्वानर इवाभाति प्रज्वलंस्तपसा द्विजः ॥४३॥ गतवैराणि भूतानि समजायन्त तद्वने ॥ मृगव्याघ्राखुमार्जारा मिथः क्रीडन्ति निर्भयाः ॥४४॥ अन्योऽपि नियमस्तस्य श्रूयतामतिदुर्लभः ॥ नारायणं त्रिकालं सः सम्पूजयति नित्यशः ॥४५॥ पुष्पाणां तु सहस्रेण विकचेन सुगन्धिना ॥ वेदसूक्तैर्विधानेन विष्णुध्यानपरायणः ॥४६॥ विष्णोः संप्रीतये विप्रः कुरुते कर्म चाखिलम् ॥ दधीचेर्वरदानात् स सञ्जातो वैष्णवोत्तमः ॥४७॥ एकदा मासि वैशाख एकादश्यां मुदा मुनिः ॥ पूजां कृत्वा हरे रम्यां विचित्रामकरोत् स्तुतिम् ॥४८॥ तदैव खगमारुह्य देवदेवो

नारायण की तीनों काल में पूजा करता था ॥ ४५ ॥ खिले हुए सुगन्धित हजारों फूलों को चढ़ा कर वेदसूक्त की विधि से वह विष्णु के ध्यान में लीन रहता था ॥ ४६ ॥ वह ब्राह्मण विष्णु भगवान् को प्रसन्न करने के लिये यह सब कार्य करता था, दधीचि ऋषि के वरदान से वह उत्तम वैष्णव हुआ था ॥ ४७ ॥ एक बार उस मुनि ने वैशाख मास में एकादशी के दिन प्रसन्नता से हरि भगवान् की सुन्दर पूजा करके विचित्र स्तुति किया ॥ ४८ ॥ उसी समय देवों के

देव भगवान् हरि गरुड़ के ऊपर चढ़ कर उसकी स्तुति से प्रसन्न होकर स्वयं उसके पास आये ॥ ४९ ॥ चतुर्भुज, विशालाक्ष, अलंकारों से विभूषित, मेघ की छवि के तुल्य गरुड़ पर चढ़े हुए भगवान् को प्रत्यक्ष देख कर ॥ ५० ॥ उस ब्राह्मण का संपूर्ण शरीर रोमाञ्चित हो गया और आनन्द के आँसू आँखों में भर गये, मन में कृतकृत्य होकर वह

हरिः स्वयम् ॥ आजगाम पुरस्तस्य तया स्तुत्याऽतिहर्षितः ॥ ४९ ॥ तं दृष्ट्वा गरुडारूढं प्रत्यक्षं जलदच्छविम् ॥ चतुर्बाहुं विशालाक्षं सर्वालङ्कारभूषितम् ॥ ५० ॥ उद्भूतपुलको विप्रः सानन्दजललोचनः ॥ जगाम शिरसा भूमौ कृतकृत्यमनास्तदा ॥ ५१ ॥ न ममौ तेन हर्षेण स ब्रह्माण्डोदरेऽपि हि ॥ न सस्मार निजं देहं ब्रह्मीभूत इवाभवत् ॥५२॥ ततः सम्भाषितः प्रीत्या हरिणा वैष्णवो मुनिः ॥ श्रीभगवानुवाच—देवद्युते विजानामि मद्भक्तस्त्वं मदाश्रयः ॥५३॥ सन्यस्ताखिलकर्मासि मद्भावो मन्मनाः सदा ॥ वरं ब्रूहि प्रसन्नोऽस्मिस्त्रोत्रेणानेन तेऽनघ॥५४॥लोमश उवाच—इति श्रुत्वा हरेर्वाक्यं प्रत्युवाच स तापसः ॥ हर्षगद्गदया वाचा

उनके पास गया और उसने उनको दण्डवत किया ॥ ५१ ॥ वह आनन्द के कारण ब्रह्माण्ड में भी समा न सका, उसने अपनी शरीर का भी स्मरण नहीं किया और ब्रह्मरूप हो गया ॥ ५२ ॥ तब भगवान् हरि ने प्रीति पूर्वक उस वैष्णव मुनि से कहा। श्री भगवान् ने कहा—हे देवद्युति ! मैं जानता हूँ कि तुम मेरे भक्त और मेरे आश्रय हो ॥ ५३ ॥ संपूर्ण कर्मों को त्याग कर तुम सर्वदा जीवन पर्यन्त मुझमें लीन हो, हे पाप रहित ! तुम्हारे स्त्रोत्र से मैं प्रसन्न हूँ, तुम

वर माँगो ॥ ५४ ॥ लोमशजी ने कहा—इस प्रकार भगवान् हरि के वाक्य को सुनकर उस तपस्वी ने आनन्द के मारे आँखों को बन्द किये हुए लड़खड़ाती हुई वाणी से कहा। देवद्युति ने कहा—हे देवों के देव! हे कमललोचन! अपनी माया से ही शरीर धारण करने वाले ॥ ५५ ॥ हे देव! आपका दर्शन जो देवताओं को सर्वदा दुर्लभ है उससे मैं कृतकृत्य

हर्षसुच्छन्नलोचनः ॥ देवद्युतिरुवाच—देवदेवारविन्दाक्ष स्वमायाधृतविग्रह ॥ ५५ ॥ त्वद्दर्शनात् सदा देव दुर्लभो नापरो वरः ॥ ब्रह्मादयः सुराः सर्वे योगिनः सनकादयः ॥५६॥ त्वां साक्षात् कर्तुमिच्छन्ति सिद्धाश्च कपिलादयः ॥ अहं ममेति ये पाशा मोहमूलाः शुभाशुभाः ॥ ५७ ॥ सहेतुकाश्च दह्यन्ति त्वयि दृष्टे परावरे ॥ जन्मनः कर्मणो बुद्धेराविर्भूतं फलं मम ॥ ५८ ॥ यद् दृष्टोऽसि जगन्नाथ दुष्प्राप्यं किमतः परम् ॥ न वरार्थं हि देवेश त्वत्पादकमलं हृदि ॥५९॥

हुआ. अब मुझ और कुछ नहीं चाहिए, ब्रह्मादि सब देवता तथा सनकादिक ऋषि ॥ ५६ ॥ कपिलादि सिद्ध लोग आपका साक्षात् दर्शन करना चाहते हैं हम हमारा (अर्थात् अहंकार) रूपी जो शुभाशुभ बन्धन मोह के मूल हैं ॥ ५७ ॥ आपके अपूर्व दर्शन के कारण समूल नष्ट हो जाते हैं; मेरे जन्म, कर्म तथा बुद्धि का फल प्रत्यक्ष हो गया ॥ ५८ ॥ जो मुझको आपका अलभ्य-दर्शन प्राप्त हुआ, हे जगत् के स्वामी! इससे बढ़ कर और क्या हो सकता है, देवेश! मैं वर के लिये आपके चरण कमल का हृदय में धारण करना नहीं माँगता ॥ ५९ ॥ मैं सर्वदा अन्तरात्मा से भक्ति

पूर्वक आपका चिन्तन करूँ मैं यही वह माँगता हूँ कि आपमें मेरी भक्ति सदा अचल रहे ॥ ६० ॥ हे कमलानाथ ! मैं केवल यही वर माँगता हूँ, दूसरा नहीं माँगता, ऐसा उसका वचन सुनकर हरि भगवान् ने ॥ ६१ ॥ प्रसन्न चित्त होकर उससे कहा हे द्विजश्रेष्ठ! ऐसा ही हो, तुम्हारे किसी तप में कोई विघ्न न होगा ॥ ६२ ॥ जो मनुष्य तुम्हारे कहे हुए

चिन्तयाम्यनिशं भक्त्या त्वद्गतेनान्तरात्मना ॥ इममेव वरं याचे त्वद्भक्तिरचला मम ॥६०॥ अतस्तु कमलानाथ प्रार्थये नापरं वरम् ॥ इति श्रुत्वा वचस्तस्य प्रसन्नहृदयो हरिः ॥६१॥ प्रत्युवाच प्रसन्नात्मा एवमस्तु द्विजोत्तम ॥ अन्यस्ते तपसः कश्चित्प्रत्यूहो न भविष्यति ॥६२॥ एतच्च त्वत्कृतं स्तोत्रं ये पठिष्यन्ति मानवाः ॥ तेषां मद्विषया भक्तिर्निश्चला च भविष्यति॥६३॥धर्मकार्यं च यत् किञ्चित् साङ्गं सर्वं भविष्यति ॥ ज्ञाने च परमा निष्ठा तेषां स्थास्यति सर्वदा ॥६४॥

इति श्रीपद्मपुराणे उत्तरखण्डे माघमाहात्म्ये वसिष्ठदिलीपसंवादे देवद्युतिवरप्रदानं नाम एकविंशोऽध्यायः ॥ २१ ॥

स्तोत्र का पाठ करेंगे, उनकी मुझमें निश्चल भक्ति होगी ॥ ६३ ॥ जो कुछ धर्म कार्य है वह भी सब सांगोपाङ्ग पूर्ण होगा और उन लोगों की ज्ञान में परम निष्ठा होगी ॥ ६४ ॥

श्री पद्मपुराण के माघमाहात्म्य में वसिष्ठ और दिलीप के संवाद में देवद्युति का वरदान नामक इक्कीसवाँ अध्याय समाप्त हुआ ॥ २१ ॥

वसिष्ठजी ने कहा—ऐसा कह कर देवों के देव भगवान् जनार्दन अन्तर्धान हो गये, तब से देवद्युति नारायण के ध्यान में लीन हो गये ॥ १ ॥ वेदनिधि ने कहा—हे महर्षि ! मैं कृतकृत्य हुआ, जिस प्रकार से गंगाजी में स्नान करने से मनुष्य पवित्र होता है उसी प्रकार से इस विष्णु की कथा से मै आज पवित्र हुआ हूँ ॥ २ ॥ मुझको बड़ा कौतूहल है इसलिये

वासिष्ठ उवाच—इत्युक्त्वा स तिरोभूतो देवदेवो जनार्दनः ॥ देवद्युतिस्तदाऽऽरभ्यंनारायण-परोऽभवत् ॥१॥ वेदनिधिरुवाच—महर्षेऽनुगृहीतोऽस्मि कथया पावनीकृतः ॥ अनया विष्णु-सङ्गत्या गङ्गयेवाहमद्यवै ॥२॥ किं तत् स्तोत्रं ममाख्याहि प्रसन्नो येन माधवः ॥ तस्याऽनघस्य विप्रस्य महत् कौतूहलं मम ॥३॥ त्वत्प्रसादादहं विप्र मन्ये प्राप्तं मनोहरम् ॥ महतां सङ्गतिः कस्य महत्त्वाय न कल्पते ॥४॥ कथयस्व प्रसादेन विष्णोः स्तोत्रमनुत्तमम् ॥ येन तुष्टः स भगवान् ददौ तस्य च दर्शनम् ॥५॥ लोमश उवाच—कथयामि रहस्यं तत् यज्जाप्यं स्तोत्रमु-

(कृपाकर) उस स्तोत्र को कहिये जिससे पाप रहित ब्राह्मण ने माधव भगवान् को प्रसन्न किया था ॥ ३ ॥ हे विप्र ! आपकी कृपा से मैं अपने को सिद्ध मनोरथ समझता हूँ, बड़ों की संगति किसको महत्त्व के लिये नहीं होती ॥ ४ ॥ कृपा करके विष्णु के उस अद्वितीय स्तोत्र को कहिये जिससे प्रसन्न होकर भगवान् ने उसको दर्शन दिया था ॥ ५ ॥ लोमशजी ने कहा—मैं तुमसे वह रहस्य कहता हूँ, यह जो जपने योग्य उत्तम स्तोत्र है उसको पहिले गरुड़जी ने पढ़ा

था, उनसे यह मुझे प्राप्त हुआ ॥ ६ ॥ हे विप्र ! यह अध्यात्म (विद्या) का तत्त्व है, बड़ा उदय करने वाला, शुभ, सब पापों को हरने वाला, और आत्मज्ञान कराने में श्रेष्ठ है ॥ ७॥ वासुदेव को, विश्व में व्याप्त को, चक्रधारण करने वाले को, भक्तों के प्रिय को, कृष्ण को जगत् के स्वामी को, तेज स्वरूप भगवान् को नमस्कार हो ॥ ८ ॥ जब स्तुति

त्तमम् ॥ प्राग्गृहीतं सुपर्णेन गरुडान्मम चागतम् ॥६॥ अध्यात्मगर्भसारं तन्महोदयकरं शुभम् ॥ सर्वपापहरं विप्र स्वात्मज्ञानकरं परम् ॥७॥ ॐ नमो वासुदेवाय नमो विश्वस्य चक्रिणे ॥ भक्तिप्रियाय कृष्णाय जगन्नाथाय तेजसे ॥८॥ स्तोता स्तुत्यः स्तुतिः सर्वं जगद्विष्णुमयं यदा ॥ तदा संस्तूयते केन बुद्धिर्भेदकरी नृणाम् ॥९॥ यस्य देवस्य निःश्वासो वेदाः साङ्गाः ससूत्रकाः ॥ का स्तुतिः प्रमुदे तस्य भक्त्याऽहं मुखरोऽभवम् ॥१०॥ वेदो न वेत्ति यं साक्षान्न च वाग्वेत्ति नो मनः ॥ मद्विधस्तं कथं स्तौति भक्तिमान् वा कथं भवेत् ॥११॥ चक्रवद् भ्रमते

करने वाला, जिसकी स्तुति की जाय वह, तथा स्तुति सभी जगत् विष्णुमय है तब किससे स्तुति की जाय (क्योंकि) मनुष्य की बुद्धि भेद करने वाली होती है ॥ ९ ॥ जिस देव के निःश्वास (श्वास का बाहर को निकालना) सूत्र तथा अङ्गों सहित वेद हैं, भला कौन सी स्तुति उनके प्रसन्नता के लिये होगी, परन्तु भक्ति से मैं वाचाल हुआ हूँ ॥ १० ॥ जिसको साक्षाद् (रूप में) वेद नहीं जानते, न वाणी, न मन जानता है, उसकी स्तुति मुझ सरीखा (ज्ञानहीन) कैसे

कर सकता है और भक्तिमान कैसे हो सकता है ॥ ११ ॥ चर तथा अचर सम्पूर्ण त्रैलोक्य (आपकी आज्ञा से) चक्र के समान घूम रहा है। इसी कारण हे देव ! आप उत्तम शस्त्र वाले चक्रपाणि (गाये जाते) कहलाते हो ॥ १२ ॥ ब्रह्मा के तथा विष्णु के आदि (रूप) तुम ही हो ब्रह्मा के शरीर हो, सबके उत्पन्न करने वाले, ब्रह्मा के भी आदि

सर्वं त्रैलोक्यं सचराचरम् ॥ ततस्त्वं गीयसे नाथ चक्रपाणिर्वरायुधः ॥ १२ ॥ ब्रह्मादिब्रह्म विष्णुस्त्वं त्वमेव ब्रह्मणो वपुः ॥ स्रष्टा ब्रह्मनिदानं च शुद्धं ब्रह्म त्वमेव च ॥ १३ ॥ कायं कायि युगं या चिद्भित्त्वा स्पृशति कायिनम् ॥ कायदोषैरनाघ्रातस्तया त्वं भासि योगिनाम् ॥ १४ ॥ देवभावेन जागर्ति न निद्राति निजात्मनि ॥ सुखसन्देहबुद्धिर्या सा त्वं विष्णो न संशयः ॥ १५ ॥ महदादिद्विधाभावास्तथा वैकारिको गुणः ॥ त्वमेव नाथ तत्सर्वं नानात्वं

कारण शुद्ध ब्रह्म तुम ही हो ॥ १३ ॥ अचित् (शरीर) तथा जीव इन दोनों का भेद जब शरीरधारी को स्पर्श करता है तब उसको ज्ञान उत्पन्न होता है, आप (उपरोक्त) काय के दोष से छूँवे (छुये) भी नहीं जा सकते ॥ १४ ॥ आप (सर्वदा) देवभाव से जागते हो, अपने आत्मरूप में कभी नहीं सोते, विष्णु तुम निःसन्देह सुख समुदाय रूपी ही हो ॥ १५ ॥ (सुख समुदाय रूपी बुद्धि देहरूप से जागती है अर्थात् देहाभिमान से ही प्रकाशित होती है, अपनी आत्मा में अपने अपने रूप से सोती नहीं अर्थात् पराङ्मुख नहीं होती, तुम सब सुखों के समुदाय सम्बन्धी बुद्धि हो, केवल इसी आनन्द के कारण प्राणी जीवित रहते हैं—ऐसा श्रुति वाक्य है) हे नाथ! आप ही पाँचों कर्मेन्द्रिय, पंचमहाभूत तथा

मन के विविध भाव हो, रुद्र ब्रह्मादि तुम्हारे बने हुए ही रूप हैं, तुम पृथक्-पृथक् हो, यह मूर्खता की कल्पना है ॥ १६ ॥ हे ब्रह्मन्! (क) ब्रह्मा, (ईश) रुद्र तथा (केशव) विष्णु इन तीन कल्पनाओं से तुम संसार की कल्पना वैसे ही करते हो जैसे पिता पुत्र की करता है ॥ १७ ॥ आपकी एक चित् मूर्ति ने सम्पूर्ण संसार को विना दोष (अर्थात् राग, मोह, द्वेष इत्यादि) के और विना गुण (अर्थात् सजातीय, विजातीय, स्वगतभेद इत्यादि) के बना रक्खा है। कवियों में

मूढकल्पना ॥ १६ ॥ केशकेशवरूपाभिः कल्पना तिसृभिस्तथा ॥ त्वमेव कल्पसे ब्रह्मन् पुत्रादिभिः पुमानिव ॥१७॥ विदोषं विगुणं चैकं चिन्मूर्तिमखिलं जगत् ॥ कवीनां भाति यद्रूपं तं विष्णुं नौमि निर्गुणम् ॥ १८ ॥ यस्मिन् ज्ञातेन कुर्वन्ति कर्मजातं श्रुतीरितम् ॥ निरैषणं जगन्मित्रं शुद्धं ब्रह्म नमामि तत् ॥१९॥ स्वं स्वेतरं च सन्मात्रं यत्प्रबोधादुपासते॥ योगिनः सर्वभूतेषु सद्रूपं नौमि तं हरिम् ॥२०॥ ब्रह्माहमिति गायन्ति यजन्त्येकचरा द्विजाः॥

जो रूप शोभा देता है उस निर्गुण विष्णु भगवान् को मैं नमस्कार करता हूँ ॥ १८ ॥ जिसमें ज्ञान रखने से श्रुतियों में कहे हुए कर्मों को लोग करते हैं, इच्छा रहित संसार के मित्र उस शुद्ध ब्रह्म को मैं नमस्कार करता हूँ ॥ १९ ॥ मैं उस सत् रूप हरि को नमस्कार करता हूँ जिनकी योगि लोग सब प्राणियों में आत्मरूप में, अपरात्मा के रूप में तथा सबके आत्मरूप में उपासना करते हैं ॥ २० ॥ जिसको अद्वैत ब्राह्मण लोग "मैं ब्रह्म हूँ" ऐसा कहते हुए गाते और

यज्ञ करते हैं और अपने को आपके समान देखते हैं उस माधव भगवान् का नमस्कार करता हूँ ॥ २१ ॥ मैं उस चित् रूपी आत्मा को नमस्कार करता हूँ जो मनुष्यों के माया तथा मोह से उत्पन्न विचित्र आभास, अहंकार तथा ममता को जानकर नष्ट करते हैं ॥ २२ ॥ संसार में मनुष्यों के मोह रूपी वायु से सर्वदा भभकने वाली ज्वाला आपके

पश्यन्तो हि त्वया तुल्यं देवं तन्नौमि माधवम् ॥२१॥ माया मोहो विचित्राभस्तथाऽहं ममता नृणाम् ॥ विलीयन्ते विदित्वा यं नमस्तस्म चिदात्मने ॥ २२ ॥ मोहानलोल्लसज्ज्वालाज्वलल्लोकेषु सर्वदा ॥ यत्पदाम्भोदरच्छायां प्रविष्टो नामुदह्यते ॥२३॥ यस्य स्मरण मात्रेणन मोहो नैव दुर्गतिः ॥ न रोगा नेव दुःखानि तमनन्तं नमाम्यहम् ॥२४॥ कामयन्ते प्रजा नैव ह्येषणाभ्यः समुत्थिताः ॥ लोकमात्मैव पश्यन्ति यं बुद्ध्वैकचरा नराः ॥२५॥ शब्दार्थः संविदर्थश्च विष्णोर्नास्त्यपरो यदि ॥ सत्येन तेन संसारो मा मां स्पृशतु माधव ॥ २६ ॥ नारा-

चरण कमल की छाया पड़ने से नहीं जलाती ॥ २३ ॥ मैं उस अनन्त (रूप) को नमस्कार करता हूँ जिसके स्मरण मात्र से ही मोह, दुर्गति, रोग तथा दुःख कुछ भी प्राप्त नहीं होते ॥ २४ ॥ जिसको प्राप्त कर लेने पर प्रजा और किसी दूसरे की इच्छा नहीं करती, जिसको जान कर अद्वैत वादी मनुष्य आत्मा के सदृश देखते हैं ॥ २५ ॥ यदि विष्णु शब्द का अर्थ और इनके विषय का ज्ञान पृथक् न हो (अर्थात् एक ही हो) तो इस सत्य से हे माधव !

संसार मेरा स्पर्श न करे। अर्थात् मैं संसार के माया में फँस कर तेरे ही ध्यान में लीन रहूँ ॥ २६ ॥ यदि वेदान्त दर्शन से सम्मत नारायण सम्पूर्ण संसार में व्याप्त हैं तो इसी सत्य से मेरी विष्णु भगवान् में निर्विघ्न भक्ति हो ॥ २७ ॥ जो बीज नहीं है अर्थात् किसी वस्तु के कारण नहीं हैं तो भी विना बीज के अर्थात् हेतु के स्वयं विद्यमान हैं, जो बीजों के बीज से युक्त हैं वह भगवान् विष्णु ज्ञान रूपी

यणो जगद्व्यापी यदि वेदान्तसम्मतः ॥ सत्येन तेन निर्विघ्ना विष्णोर्भक्तिर्ममास्तु वै ॥२७॥ यो न बीजं विना बीजं बीजे यो बीजभावतः ॥ स विष्णुर्भवबीजं मे शितविद्याऽसिना द्यतु ॥२८॥ त्रितनुनटवद्यस्तु सृष्टिस्थितिलयेषु च ॥ गुणैर्भवति कार्येषु स प्रसीदतु मे हरिः ॥२९॥ दशदेहावतीर्णो यो धर्मत्राणाय केवलम् ॥ अभ्यर्थितः सुरैः सर्वैः स प्रसीदतु मे हरिः ॥३०॥ ब्रह्मादिस्तम्बपर्यन्तं प्राणिहृन्मन्दिरेऽमलः ॥ एको वसति यो देवः स प्रसीदतु मे

खड्ग से हमारे संसार के बीज को टुकड़े टुकड़े कर दें ॥ २८ ॥ जो संसार की सृष्टि, स्थिति तथा लय क लिये नट के समान (ब्रह्मा, विष्णु, महेश के) तीन रूप धारण करते हैं और इन कार्यों में सत्व रज, तम इन तीनों गुणों से विद्यमान रहते हैं वह भगवान् मुझ पर प्रसन्न हों ॥ २९ ॥ जिन्होंने सब देवताओं से प्रार्थना किये जाने पर दश बार देह धारण किया (अर्थात् दश अवतार लिया) वह भगवान् मुझ पर प्रसन्न हों ॥ ३० ॥ ब्रह्मादि से स्तम्ब पर्यन्त प्राणियों के हृदय रूपी मन्दिर में जो एक निर्मल देव निवास करते हैं, वह भगवान् मुझ पर प्रसन्न

हों ॥३१॥ सृष्टि के पूर्व जिस देव ने पहिले देखा, जो एक से अनेक हुआ, जिसने सृष्टि करके देवताओं में प्रवेश किया वह भगवान् मुझपर प्रसन्न हों ॥ ३२ ॥ हृदयरूपी आकाश में (अन्तर्यामी होने के कारण) वर्तमान, आकाश के समान सर्वत्र व्यापक, आकाश के भी आदि (अर्थात् उत्पन्न करने वाले) इन्द्रियों के रहित, इन्द्रियो की क्रिया में प्रेरणा रूप कार्य करने वाले, आकाश गामी (हृदय रूपी आकाश में अन्तर्यामी होकर विचरने वाले) खं ब्रह्म, प्रलय

हरिः ॥३१॥ ईक्षांचक्रे स देवाग्रे य एकश्च बहुस्तथा ॥ प्रविष्टो देवताः सृष्ट्वा स प्रसीदतु मे हरिः ॥३२॥ हृत्खगः खसमः खादिः खातितः खक्रियः खगः ॥ खं ब्रह्म खादिभुक् चान्ते खमूर्तिस्त्वं मखाशनः ॥३३॥ यद्भासा यन्मुदा यस्य सत्तया संत्यजेद्यमी । जाड्य दुःखासमत्वं च स भवानेव तन्मयः ॥३४॥ त्वत्सृष्टं मोदते विश्वं त्वत्त्यक्तमशुचिर्भवेत् ॥ त्वत्संगतोऽप्यसंगस्त्वं विकारस्तेन तेन हि ॥३५॥ भूतयोगजचैतन्यं चार्वाकास्तामुपासते ॥ सौगताः

के अन्त में आकाश इत्यादि को नष्ट करने वाले, आकाश मूर्ति तुम यज्ञ भोक्ता हो ॥ ३३ ॥ जो रूप ज्ञान से जड़ता (अज्ञान) को तथा रूप सुख से दुःख को नाश करते हों, जिसके सद्रूप की सत्ता से संसार आकारयुक्त हुआ है जो अविद्या पूर्ण संसार का त्याग करते हो, वही जगन्मय आप हो ॥ ३४ ॥ आपका बनाया हुआ विश्व आनन्द करता है, आपसे त्याग किये जाने पर अपवित्र हो जाता है, उसका साथ करने पर भी तुम बिना साथ के बने रहते हो, इसीसे तुममें कोई विकार नहीं है ॥ ३५ ॥ जिनको चार्वाक; पञ्च भूत के योग से उत्पन्न हुआ चैतन्य मानते हुए

उपासना करते हैं, और प्रौढ़ तर्क से आपको क्षणभंगुर बुद्धि कहते हैं ॥ ३६ ॥ जैन लोग तुमको शरीर का परिणाम मानते हैं तथा सांख्यवादी तुम्हीं को प्राकृति से पर पुरुष मानकर ध्यान करते हैं ॥ ३७ ॥ जन्म इत्यादि से रहति पूर्ण, चैतन्य रूप, सर्वदा आनन्द लक्षण वाले तुमको उपनिषद् श्रेष्ठों से श्रेष्ठ ब्रह्म चिन्तन करते हैं ॥ ३८ ॥ आकाश इत्यादि

स्तुवते तर्कैस्त्वां बुद्धिं क्षणभङ्गुराम् ॥ ३६ ॥ शरीरपरिणामं त्वां मन्मन्ते जिनदेवताः ॥ ध्यायन्ति पुरुषं सांख्यास्त्वामेव प्रकृतेः परम् ॥३७॥ जन्मादिरहितं पूर्णं चित्सदानन्दलक्षणम् ॥ त्वामौपनिषदा ब्रह्म चिन्तयन्ति परात्परम् ॥ ३८ ॥ खादिभूतानि देहश्च मनो बुद्धीन्द्रियाणि च ॥ विद्याविद्ये त्वमेवात्र नान्यत्त्वत्तोऽस्ति किञ्चन ॥३९॥ प्रभवः सर्वभूतानां त्वमेव शरणं मम ॥ त्वमग्निस्त्वं हविस्त्वं स्रुक् होता मन्त्रः क्रिया फलम् ॥४०॥ त्वमस्ति नास्ति वैकुण्ठे त्वामहं शरणं गतः ॥ त्वं कर्मफलदाता च दीक्षितानां क्रियात्यये ॥ ४१ ॥ त्वं हेतुः सर्व-

पंच महाभूत, देह, मन, बुद्धि, इन्द्रियाँ, विद्या, अविद्या तुम्हीं सब कुछ हो, तुमसे पृथक् कुछ भी नहीं है ॥३९॥ तुम्हीं सब प्राणियों के उत्पन्न करने वाले हो, तुम्हीं मुझको शरण देने वाले हो, तुमही अग्नि, हवि, इन्द्र, होता, मन्त्र, क्रिया, फल सभी हो ॥ ४० ॥ तुम कर्म के फल को देने वाले तथा दीक्षितों के क्रिया की पूर्णता हो वैकुण्ठ में तुम्हारे सिवाय दूसरा कोई नहीं है, मैं तुम्हारी ही शरण में हूँ ॥ ४१ ॥ सब प्राणियों के तुमही हेतु हो, तुम हमारे शरण देने वाले

हो। जिस प्रकार युवतियों को तरुण में तथा तरुण को युवती में ॥ ४२ ॥ चित्त की प्रीति रहती है, उसी तरह मेरी भी प्रीति तुमही में रहे, हे हरे! जो पापी और दुराचारी भी मनुष्य आपको प्रणाम करता है ॥ ४३ ॥ उसको यम के दूत उसी प्रकार नहीं देखते जैसे उल्लू सूर्य को नहीं देखता, तीनों (आधिदैविक, आधिभौतिक, आध्यात्मिक)

भूतानां त्वमेव शरणं मम ॥ युवतीनां यथा यूनि यूनां च युवतौ यथा ॥ ४२ ॥ मनोऽभिरमते तद्वन्मनो मे रमतां त्वयि ॥ अपि पापं दुराचारं नरं त्वत्प्रणतं हरे ॥४३॥ नेक्षन्ते किङ्करा याम्या उलूकास्तपनं तथा ॥ तापत्रयमघौघश्च तावत्पीडयते जनम् ॥ ४४ ॥ यावच्छ्रयति नो नाथ भक्त्या त्वत्पादपङ्कजम् ॥ ४५ ॥ यं न स्पृशन्ति गुणजातिशरीरधर्मा यं न स्पृशन्ति गतयः खमिवेन्द्रियाणि ॥ यं न स्पृशन्ति मुनयो गतसङ्गमोहास्तस्मै नमो भगवते हरये प्रतीचे ॥४६॥ यद्ध्यानसंवननचूर्णवशीकृतान्ता ऐश्वर्यचारुगुणिनो सुखमोक्षलक्ष्मीम् ॥ आलिङ्ग्य

ताप तथा पापों के समूह तभी तक मनुष्य को पीड़ा देते हैं ॥ ४४ ॥ जब तक हे नाथ! वह आपके चरण कमल की सेवा नहीं करता ॥ ४५ ॥ जिसको गुण, जाति तथा शरीर के धर्म स्पर्श नहीं करते, जिसको गतियाँ स्पर्श नहीं करतीं, जिसको इन्द्रियाँ आकाशवत् वशीभूत नहीं कर सकतीं, जिसको मोह युक्त मुनि लोग साक्षात् नहीं कर सकते उस विशिष्ट भगवान् हरि को मैं नमस्कार करता हूँ ॥ जितते ऐश्वर्य अर्थात् ज्ञानरूपी सुन्दर गुण हैं, तथा जिन्होंने सुख स्वरूप

मोक्ष रूपी लक्ष्मी का आलिंगन किया है, जो आत्मस्वरूप सुखभाजन हैं तथा ध्यानरूप जीवदायी चूर्ण से जिन्होंने मृत्यु को वश में किया है इस प्रकार के मुनियों से सेवित हरि भगवान् को नमस्कार ॥४७॥ जिसका स्वभाव जन्मादि से अलग है, जिनमें काम क्रोध इत्यादि छहो ऊर्मिवर्ग शान्त हो जाते हैं, जिसको काम आदि दोष कष्ट नहीं देते—उस आमल

शेरत इहात्मसुखैकभाजस्तस्मै नमोऽस्तु हरये मुनिसेविताय ॥४७॥ जन्मादिभावविकृतैर्विरह-
स्वभावो यस्मिन्नयं परिचिनोति षड्ऊर्मिवर्गः ॥ यं ताडयन्ति न सदा मदनादिदोषास्तं वासुदेव-
ममलं प्रणतोऽस्मि हार्दम् ॥४८॥ स्थूलं विलाप्य करणे करणं निदाने तत्कारणं करणकारणव-
र्जिते च ॥ इत्थं विलाप्य यमिनः प्रविशन्ति यत्र तस्मै नमोऽस्तु हरये मुनिसेविताय ॥ ४९ ॥
यज्ज्ञानसङ्गतमलं विजहात्यविद्यां यज्ज्ञानवह्निपतितं जगदेति दाहम् ॥ यज्ज्ञानमुल्लसदसि-
द्यति संशयारि तं त्वां हरिं विशदबोधघनं नमामि ॥ ५० ॥ चराचराणि सर्वाणि भूतान्यस्य

वासुदेव भगवान् को मैं सहृदय प्रमाण करता हूँ, ॥ ४८ ॥ स्थूल करण में, तथा करण के विलीन करके, और इसके कारण को करण कारण में वर्जित करके, इस प्रकार मुनि लोग जिसमें प्रवेश करते हैं उस मुनि सेवित भगवान् हरि को मैं नमस्कार करता हूँ ॥ ४९ ॥ जिसके ज्ञान की संगति से अविद्या का मल स्वच्छ हो जाता है, किसकी ज्ञान रूपी अग्नि में पड़ कर संसार दाह को प्राप्त होता है, जिसके ज्ञान की तलवार संशयरूपी शत्रु का नाश करती है,

उस विशद बोध वाले दुःख नाश करने वाले भगवान् को में प्रणाम करता हूँ ॥ ५० ॥ सम्पूर्ण चर अचर तथा प्राणी भगवान् हरि के शरीर हैं, सत्य व्रत से भगवान् मुझको प्रत्यक्ष दर्शन दें ॥ ५१ ॥ जिस प्रकार नारायण सम्पूर्ण स्थावर तथा जंगम संसार को व्याप्त करते हैं उसी सत्य से भगवान् केशव अपना दर्शन दें ॥ ५२ ॥ जब नारायण में और

हरेर्वपुः ॥ तथा व्रतेन सत्येन पुरस्तिष्ठतु मे हरिः ॥ ५१ ॥ यथा नारायणः सर्वं जगत्स्थावर, जङ्गमम् ॥ तेन सत्येन मे देवः स्वं तर्शयतु केशवः ॥ ५२ ॥ भक्तिर्यथा हरौ मेऽस्ति तद्वरिष्ठा गुरौ यदि ॥ ममास्ति तेन सत्येन स्वं दर्शयतु मे हरिः ॥ ५३ ॥ तस्यैवं शपथैः सत्यैर्भक्तिं तस्यानुचिन्तयन् ॥ दर्शयामास चात्मानं स प्रीतः पुरुषोत्तमः ॥ ५४ ॥ ततो दत्त्वा वरं तस्मै पूरयित्वा मनोरथम् ॥ जगाम कमलाकान्तः स्तुत्या विप्रेण तोषितः ॥ ५५ ॥ कृतकृत्यो द्विजः सोऽपि वासुदेवपरायणः ॥ शिष्यैः सार्धं जपन् स्तोत्रं तस्मिन्नास्ते तपोवने ॥ ५६ ॥ कीर्तयेद्य

उनसे भी अधिक गुरु में मेरी भक्ति है, तो इसी सत्य से भगवान मुझको प्रत्यक्ष दर्शन दें ॥ ५३ ॥ इसी प्रकार के शपथों से उसकी सच्ची भक्ति जानकर भगवान् पुरुषोत्तम ने प्रसन्न होकर उसको अपना दर्शन दिया ॥ ५४ ॥ तब भगवान् कमलापति उस ब्राह्मण की स्तुति से प्रसन्न होकर उसके मनोरथ को पूर्ण करके तथा वर देकर चले गये ॥ ५५ ॥ वह ब्राह्मण भी कृतकृत्य होकर भगवान् वासुदेव में लीन हो गया, और शिष्यों के साथ स्तोत्र पढ़ता हुआ

तपोवन में रहने लगा ॥ ५६ ॥ जो मनुष्य इस स्तोत्र का कीर्तन करता है अथवा पढ़ता है उसको अश्वमेध यज्ञ का पर्याप्त फल मिलता है ॥ ५७ ॥ वह ब्राह्मण सर्वदा आत्मविद्या के प्रबोध (जागृति) को प्राप्त करता है, उसकी बुद्धि पाप में नहीं लगती और वह अशुभ नहीं देखता ॥ ५८ ॥ इस स्तोत्र के कीर्तन से सब मनुष्यों की बुद्धि, मन

कार्पटिक ने कहा—हे प्रेत ! तुमने सारस के कहे हुए वाक्य को किस प्रकार सुना था सो मैं सुनना चाहता हूँ, मुझसे शीघ्र कहो ॥१॥ प्रेत ने कहा—हे श्रेष्ठ कार्पटकि ! सुनो, मैं तुमसे सारस के वाक्य कहता हूँ, इस जङ्गल में कुहरा नाम की एक नदी पर्वत से निकली है ॥ २ ॥ (उसी के समीप) सर्वदा जल भरे ताल हैं जो मतवाले हाथियों के

कार्पटिक उवाच—सारसोदीरितं वाक्यं कीदृशं हि श्रुतं त्वया ॥ तदह श्रोतुमिच्छामि प्रब्रूहि प्रेत सत्वरम् ॥ १ ॥ प्रेत उवाच—ब्रवीमि सारसं वाक्यं शृणु कार्पटिकोत्तम ॥ कुहरा नाम क्षेत्रेऽस्मिन्नदीगिरि समुद्भवा ॥ २ ॥ सदाजला शिलोत्ताला मत्तदन्तिकुलाकुला ॥ महाकुक्कुटशोभाढ्या स्निग्धजम्बूमनोहरा ॥ ३ ॥ तस्यास्तीरमहं प्राप्तो गाहमानो घनं वनम् ॥ मयि तिष्ठति तत्रैव श्रमापनुतिकाम्यया ॥४॥ वनान्तरात् समुड्डीय सारसो लक्ष्मणा-युतः ॥ आगतः पुलिनं नद्याः सेवितं बहुपक्षिभिः ॥ ५ ॥ पीत्वा तत्रैव पानीयं मिलित्वा भार्यया सह ॥ सुप्तः पक्षपुटे वामे प्रवेश्य स्वशिरः सुखम् ॥६॥ एतस्मिन्नन्तरे दृष्टः पादपादव-

झुण्ड से व्याप्त हैं, जहाँ बड़े-बड़े ककुभ वृक्ष तथा चिकने जामुन के मनोहर वृक्ष हैं, शोभायमान ॥ ३ ॥ घने जङ्गल में घूमता हुआ मैं इसी नदी के तट पर पहुँचा, मैं थकावट दूर करने के लिये वहाँ पर ठहर गया ॥ ४ ॥ वहीं पर सारस का एक जोड़ा किसी दूसरे वन से उड़कर आया और अनेक पक्षियों से सेवित बालू पर ठहरा ॥ ५ ॥ वहाँ पर पानी

पीकर तथा भार्या से रमण करके अपने बाँये पङ्ख में सुख से मस्तक ढाँप कर सो गया ॥ ६ ॥ इसके अनन्तर लाल मुख वाला लाल नेत्र तथा तीखे दाढ़ और नख वाला बलवान् (बन्दर) वृक्ष से उतर कर ॥ ७ ॥ वेग से वहाँ पर आया जहाँ सारस सोया था, इस बन्दर के बड़े-बड़े रोवें थे, लम्बी पोंछ थी और यह बड़ा चञ्चल था ॥ ८ ॥ वहाँ पर आकर

तीर्य च ॥ रक्तानन: सुरक्ताक्षो दंष्ट्री दृढनखो बली ॥ ७ ॥ लोमशो दीर्घलांगूलश्चलच्चेष्टो हि वानरः ॥ यात्रासौ सारसः सुप्तस्तत्र वेगेन चागतः ॥ ८ ॥ समगत्य च जग्राह चरणौ सारसं दृढम् ॥ करांभ्यां क्रूरया बुद्ध्या पश्यन्तं बहु पक्षिणाम् ॥ ९ ॥ उड्डीयोड्डीय ते सर्वे गता अन्यत्र खेचराः ॥ सारसी भीत भीतं च विरावं कुर्वती स्थिता ॥ १० ॥ सारसो भग्ननिद्रश्च त्रासाच्चकितलोचनः ॥ आवलोकितवान् शीघ्रं तदोन्नम्य शिरोधराम् ॥११॥ विलोक्य वानरं पृष्ठे हन्तुकामं सुदारुणम् ॥ तदा संभाषयामास गिरा मधुरया खगः ॥ १२ ॥ अपराधं

अनेक पक्षियों को देखते हुए क्रूर बुद्धि से इस बन्दर ने अपने हाथों से सारस के पैरों को कस कर पकड़ लिया ॥ ९ ॥ वे सब पक्षी उड़ उड़ कर अन्यत्र चले गये परन्तु सारसी भयभीत होकर विलाप करती हुई वहीं रुक गई ॥ १० ॥ नींद टूटने से तथा भय से सारस के नेत्र चकित थे, उसने शिर झुका कर उसको शीघ्र देखा ॥ ११ ॥ उस दुष्ट, भयङ्कर जान मारने वाले बन्दर को देखकर उस पक्षी (सारस) ने मधुर वाणी से कहना आरम्भ किया ॥ १२ ॥ हे बन्दर ! तुम

विना अपराध के मुझको क्यों पीड़ा देते हो, संसार में राजा से भी अपराधी मनुष्य वध्य होते हैं ॥ १३ ॥ तुम्हारे समान श्रेष्ठ प्राणी किसी को पीड़ा नहीं देते हम अहिंसक साधु दूसरों की वृत्ति से विमुख रहते हैं ॥ १४ ॥ जल की काई खाने वाले, आकाश में उड़ने वाले, वन में रहने वाले अपनी ही स्त्री से प्रेम करने वाले दूसरों की स्त्री को त्यागने वाले

विना मां त्वं शाखामृग प्रबोधसे ॥ सापराधा जना लोके वाध्यन्ते भूमिपैरपि ॥ १३ ॥ न पीडयतुमर्हन्ति त्वादृशा उत्तमा जनाः ॥ अस्मानहिंसकान् साधून् परवृत्तिपराङ्मुखान् ॥१४॥ जलशवालभक्षांश्च खेचरान् वनवासिनः ॥ स्वदाररतिशीलांश्च परदारविवर्जितान् ॥१५॥ परापवादशून्यांश्च तथा स्तेनानयाचकान् ॥ दुर्वृत्तसंगहीनांश्च द्विजानपरबाधकान् ॥ १६ ॥ शाखामृग विमुञ्चाशु सर्वथा मामनागसम् ॥ जानामि तव जन्माहं न त्वं वेत्सि तु मामिह ॥१७॥ इत्याकर्ण्य वचस्तस्य मुमोच सारसं तदा ॥ चपलो वानरः शीघ्रं ईषद्दूरे व्यवस्थितः ॥१८॥

॥ १५ ॥ दूसरों की बुराई से दूर रहने वाले, चोरी न करने वाले, बुरों का साथ न करने वाले तथा दूसरों को कष्ट न देने वाले ॥ १६ ॥ सब प्रकार से निरपराधी मुझको हे वानर ! छोड दो, मैं तुम्हारे (पूर्व) जन्म का वृत्तान्त जानता हूँ, परन्तु तुम मेरा नहीं जानते ॥ १७ ॥ ऐसा वचन सुनकर बन्दर ने सारस को छोड़ दिया वह चपल बन्दर शीघ्र कुछ दूर बैठ गया ॥ १८ ॥ बन्दर ने कहा—कहो तुम कैसे मेरे पूर्व जन्म का वृत्तान्त जानते हो ?

तुम ज्ञानहीन पक्षी हो और मैं वन में घूमने वाला हूँ ॥ १९ ॥ सारस ने कहा—कि मैं अपनी जाति की स्मृति के बल से तुम्हारे पूर्व जन्म का वृत्तान्त जानता हूँ, तुम पूर्व जन्म में पर्वतेश्वर विंध्यपर्वत के राजा थे ॥ २० ॥ और मैं अति पूज्य ब्राह्मण तुम्हारे कुल का पुरोहित था, हे श्रेष्ठ वानर ! इसी से मैं तुमको अच्छी

वानर उवाच- ब्रूहि नाम कथं वेत्सि मम जन्म पुरातनम् ॥ त्वं पक्षी ज्ञान हीनश्च तिर्यक् क्वाऽहं वनेचरः ॥१९॥ सारस उवाच--जानेऽहं तावकं जन्म जातिस्मृतिमतेर्बलात् ॥ त्वं हि विन्ध्याधिपो राजा प्राग्भवे पर्वतेश्वरः ॥२०॥ अहं पूज्यतमो विप्रस्तव वंशे पुरोहितः ॥ तेन प्रत्यभिजानामि त्वां सम्यक् वानरोत्तम ॥२१॥ इमां पालयता भूमिं प्रजाः सर्वाः प्रपीडिताः ॥ त्वया विवेक-हीनेन भृशं सञ्चयता धनम् ॥२२॥ प्रजापीडनतापोत्थवह्निज्वालस्तु वानर ॥ प्राक् त्वं दग्धः पुनः क्षिप्तः कुम्भीपाकेऽतिदारुणे ॥ पुनः पुनश्च दग्धेन जातेन च पुनः पुनः ॥२३॥ नारकेण शरीरेण समास्त्रिरयुतं त्वया ॥२४॥ कुर्वता दारुणान् शब्दान् क्रन्दनं च पुनः पुनः ॥ कुम्भीपा-

तरह से जानता हूँ ॥ २१ ॥ इस भूमि का पालन करते हुए तुमने सब प्रजा को पीड़ा दिया और विवेक हीन तुमने बहुत सा धन इकट्ठा किया ॥ २२ ॥ हे वानर ! प्रजा के पीड़न रूपी अग्नि की ज्वाला से तुम पहिले ही तप चुके थे, बाद में तुम अति दुःखदायी कुम्भीपाक नामके नरक में फेंके गये ॥ २३ ॥ बारंबार दग्ध होने

से तथा वारंवार जन्म लेने से तुम्हारे नरक के शरीर में तीन हजार वर्ष बीत गये ॥ २४ ॥ तुमने वारंवार चिल्लाते हुए और पीडा का शब्द करते हुए कुम्भीपाक नरक की तीव्र अग्नि की यातना का अनुभव किया ॥ २५ ॥ फिर नरक से निकल कर बचे हुए पाप के कारण अब तुम बन्दर की योनि में जनमे हो और मुझको मारना चाहते हो ॥ २६ ॥

कानले तीव्रे ह्यनुभूताश्च यातनाः ॥ २५ ॥ निस्तीर्णनरको भूयः पापशेषेण साम्प्रतम् ॥ प्राप्तोऽसि वानरं जन्म येन मां हन्तुमिच्छसि ॥२६॥ विप्रस्योपवनात् पूर्वं प्राप्तवांश्च फलानि वै ॥ अननुज्ञाप्य भुक्तानि त्वयाऽपहतपौरुषात् ॥२७॥ विपाकः कर्मणस्तस्य फलं ते यस्य दारुणः ॥ वानरत्वं वने वासो ह्यधुना येन वर्तते ॥२८॥ अशुभस्य शुभस्यापि पुरा विहितकर्मणः ॥ भोगः क्रीडति भूतेषु योऽलंघ्यस्त्रिदशैरपि ॥२९॥ इत्थं ते जन्म जानामि यथावच्च सहेतुकम् ॥ प्राप्तः सारसदेहोऽपि ज्ञानस्य परिबोधकः ॥३०॥ इति श्रुतकथो विप्र वानरोऽप्याह सारसम् ॥ वानर

पहिले तुमने ब्राह्मण के बगीचे में बिना उसकी आज्ञा के अपने बल से लूट कर उसके पके हुए केले खाये थे ॥ २७ ॥ उस कर्म का यह भयङ्कर फल हुआ सो देखो, हे वानर ! उसी पाप के कारण तुम अब वानर और वनवासी हुए हो ॥२८॥ प्राणी ससार में अपने पहिले किये हुए शुभ तथा अशुभ कर्म का फल भोगता है, इसको देवता लोग भी हटा नहीं सकते ॥२९॥ इस प्रकार से हेतु सहित मैं तुम्हारे जन्म को पूर्ण रीति से जानता हूँ, मैं सारस का शरीर प्राप्त करके भी अज्ञान से मोहित नहीं हुआ हूँ ॥३०॥ हे ब्राह्मण ! ऐसी कथा सुनकर वानर ने सारस से कहा । वानर बोला—तुम ठीक जानते हो

तो बतलाओ तुम पक्षी कैसे हुए ? ॥३१॥ सारस ने कहा—यदि तुम वह सब सुनना चाहते हो तो मैं तुमसे बतलाता हूँ कि किस कर्म से मैं पक्षि की योनि को प्राप्त हुआ तथा इस दुर्गति को पहुँचा ॥३२॥ तुमने पूर्व जन्म में सूर्य ग्रहण में नर्मदा नदी के तट पर बहुत से ब्राह्मणों के निमित्त अन्न के सौ ढेर दान किये थे ॥ ३३ ॥ पुरोहित के मद से (अर्थात्

उवाच—सम्यग्वेत्ति भवान्नूनं त्वं कथं पक्षितां गतः ॥ ३१ ॥ सारस उवाच—कथयिष्यामि तत्कर्म येनाहं दुर्गतिं गतः ॥ पक्षियोनिं गतो येन तत्सर्वं श्रोतुमर्हसि ॥३२॥ धान्यराशिशतं साग्रमुत्सृष्टं हि त्वया पुरा ॥ बहुभ्यो ब्राह्मणेभ्यश्च नर्मदायां रविग्रहे ॥३३॥ पौरोहित्यमदाल्लोभाद्वञ्चयित्वा द्विजांस्तदा ॥ किञ्चिद्दत्त्वा तु तेभ्यश्च गृहीतमखिलं मया ॥ ३४ ॥ विप्रसाधारणद्रव्यग्रहणोत्पन्नपातकात् ॥ पतितः कालसूत्रेऽहं नरके रक्तकर्दमे ॥३५॥ चलत्कृमिसुसम्पूर्णे दुर्गन्धे पूयफेनिले ॥ आनाभेस्तत्र मग्नोऽस्मि लिहन् पूयमधोमुखः ॥३६॥ तदोपरि महागृध्रैर्भक्ष्य-

मैं राजा का पुरोहित हूँ यह समझ कर) मैंने ब्राह्मणों को ठग कर तथा उनको थोड़ा सा अन्न देकर सब ले लिया ॥ ३४ ॥ ब्राह्मणों के साधारण द्रव्य का अपहरण करने से उत्पन्न पाप से मैं कालसूत्र तथा रक्तकर्दम नामक नरक में पड़ा ॥ ३५ ॥ जहाँ सर्वत्र कीड़े रेंगते थे और जो दुर्गन्ध और पीव से भरा था, वहाँ पर नाभि तक नीचे सिर किये गड़ा रह कर मैं पीव चाटता था ॥ ३६ ॥ इसके ऊपर भी यह (यह यातना थी कि) मेरे शरीर को बड़े बड़े गिद्ध,

तथा कौवे और कीड़े बराबर काटते और खाते थे ॥ ३७ ॥ उस लोहू के कीचड़ में मैं तब श्वास रहित हो गया, उस समय मेरा एक क्षण महाकल्प के समान हो गया था ॥ ३८ ॥ तीन हजार वर्ष मुझको इस प्रकार की यातना भोगते हुए बीत गये, हे वानर ! मैं नरक के दुःख को मुख से कह नहीं सकता ॥ ३९ ॥ तब नरक रूपी सागर को पार करके

माणस्तु वायसैः॥ कृमिभिस्तुद्यमानश्च भग्नदेहो निरन्तरम् ॥३७॥ तस्मिन् शोणितपङ्केऽहं निरुच्छ्वासोऽभवं तदा ॥ मुहूर्तोऽपि महाकल्पशतं जातो ममात्र वै ॥ ३८ ॥ यातनां चानुभूयेत्थं समास्त्रिरयुतं मया ॥ वक्तुं वाचा न शक्नोमि दुःखं वानर नारकम् ॥३९॥ दैवात् कथमपि प्राप्त उत्तारो नरकाम्बुधेः ॥ येन कर्मविपाकेन शकुनित्वमुपस्तिम् ॥४०॥ तथापि श्रूयतां वक्ष्ये निःशेषेण सहेतुकम् ॥ अपहृत्य मया कांस्यभाजनं भगिनीगृहात् ॥ ४१ ॥ आक्षिकाय मया दत्तं तेन मे सारसी गतिः ॥ इयं च ब्राह्मणी पूर्वं कांस्यचोरी सुदारुणा ॥ ४२ ॥ तेनेयं सारसी जाता मद्भार्या सहधर्मिणी ॥ इत्थं वानर ते सर्वं कथितं कर्मणः फलम् ॥ ४३ ॥ वृत्तं च वर्तमानं

मैंने किसी प्रारब्धवश उद्धार पाया, और कर्मफल से पक्षी का जन्म पाया ॥ ४० ॥ मैं कारण सहित सब वृत्तान्त कहता हूँ सुनो, मैंने बहिन के घर से पूर्वजन्म में काँसे का बरतन चुराया था ॥ ४१ ॥ इसको मैंने जुवारी को दिया था, इसी से मैं सारस हुआ, यह मेरी स्त्री पूर्वजन्म में ब्राह्मणी थी और इसने काँसे की भयंकर चोरी की थी ॥ ४२ ॥ इससे यह मेरी सहधर्मिणी भार्या सारसी हुई, हे वानर ! इस प्रकार से मैंने तुमसे कर्म का सब फल कह दिया ॥ ४३ ॥

बीती हुई तथा वर्तमान स्थिति ऐसी है, अब होने वाली (भविष्य) वार्ता सुनो, मैं अब हंस हूँगा और तुम भी हंस होगे ॥ ४४ ॥ यह मेरी सारसी भार्या भी हंसी होगी, हम लोग कामरूप देश में सुखपूर्वक निवास करेंगे ॥ ४५ ॥ इसके अनन्तर हम लोग कल्याणी गोयोनि में जावेंग, तब दुर्लभ मनुष्य जन्म पावेंगे ॥ ४६ ॥ (इस मनुष्य योनि में)

च भविष्यं शृणु साम्प्रतम् ॥ अहं हंसो भविष्यामि त्वं च हंसो भविष्यसि ॥ ४४ ॥ हंसीयमपि मद्भार्या सारसी च भविष्यति ॥ देशे च कामरूपे वै स्थास्यामोऽत्र यथासुखम् ॥ ४५ ॥ गोयोनिं भावि कल्याणीं यास्यामस्तदनन्तरम् ॥ ततश्च मानुषं जन्म प्राप्स्यामो दुर्लभं पुनः ॥४६॥ श्रेयस्तद्विपरीतं च प्राणिभिर्यत्र साध्यते ॥ एवं सर्वान् शिवो जन्तून् मोहयित्वा स्वमायया ॥४७॥ सुखैर्भुनक्ति दुःखैश्च नास्मानपि स केवलम् ॥ अयं लोके प्रवृत्तश्च मार्गो विधिविनिर्मितः ॥ ४८ ॥ धर्माधर्मं मयाऽत्यर्थं सुखदुःखफलात्मकम् ॥ सेवितः प्राणिभिः सर्वः सर्वदा तैः पुनः पुनः ॥४९॥ देवासुरनरव्याघ्रक्रिमिकीटजलेचरैः ॥ नातिक्रान्तो हि केनापि पन्थाऽयं

प्राणी पुण्य और पाप दोनों ही करते हैं, इस प्रकार शिवजी सब जन्तुओं को अपनी माया से मोहित करते हैं ॥ ४७ ॥ न केवल हमी को परन्तु सभी को सुख और दुःख से युक्त करते हैं, इस लोक में प्रवृत्ति के नाना प्रकार के मार्ग हैं ॥ ४८ ॥ जो धर्म तथा अधर्म करने वालों को (तदनुसार) सुख दुःख का फल देते हैं इसीसे सब प्राणियों को सर्वदा धर्म का सेवन करना चाहिये ॥ ४९ ॥ देवता, असुर, मनुष्य, व्याघ्र, कीड़े मकोड़े, जलचर, किसी से भी यह दुःखरूपी

कंटक से भरा हुआ मार्ग छूटा नहीं है ॥ ५० ॥ केवल वेदान्त दर्शन के पारंगत विरक्त योगी लोग ही इस कंटक से दूर रहते हैं, थोड़ा अथवा अधिक पुण्य पाप का ॥ ५१ ॥ फल देश काल जान कर महादेवजी देते हैं, इस प्रकार विधि विधान को जानने वाले ईश्वर की माया को जानकर ॥ ५२ ॥ बड़े-बड़े बुद्धिमान लोग शोक, ताप तथा व्यथा नहीं करते,

दुःखकण्टकः ॥५०॥ विरक्तान् योगिनो ध्यातॄन् विना वेदान्तपारगान् ॥ अणोरपि गुरोर्वापि पुण्यापुण्यस्य कर्मणः ॥५१॥ ददाति हि फलंज्ञात्वा देशं कालं महेश्वरः॥ इत्थं विधिविधानज्ञां मायां ज्ञात्वेश्वरस्य च ॥५२॥ न शोचन्ति न तप्यन्ते न व्यथन्ति महाधियः॥ नान्यथा शक्यते कर्तुं विपाकः पूर्वकर्मणाम् ॥५३॥ उपायैः प्रज्ञया वापि शाखामृगसुरैरपि ॥ पुरा त्वं भूपतिर्जातः पश्चाज्जातोऽसि नारकी ॥५४॥ अधुना वानरो भूयो जन्म प्राप्स्यसि तादृशम् ॥ इति मत्वा विशोकस्त्वं शाखामृग यथासुखम् ॥ ५५ ॥ प्रतीक्षां कुरु कालस्य रममाणो वने वने ॥ अहमप्येवमीशस्य मायाबद्धो वने वने ॥५६॥ क्षपयिष्यामि वै जन्म धैर्यमास्थाय सारसम् ॥

वे पूर्व (जन्म के किये हुए) कर्म के फल को उलट नहीं सकते ॥ ५३ ॥ हे बन्दर ! उपाय से, बुद्धि से, देवता लोग भी इसको पलट नहीं सकते, पहिले तुम राजा थे बाद में नरक में गये ॥ ५४ ॥ अब तुम बन्दर हुए, फिर भी ऐसा ही जन्म पाओगे, हे वानर ! ऐसा समझ कर विना शोक किये तुम आनन्दपूर्वक ॥ ५५ ॥ इस वन में विचरते हुए काल की प्रतीक्षा करो, और भी ईश्वर की माया से बँधा हुआ इसी प्रकार से जंगल जंगल ॥ ५६ ॥ धैर्य धारण किये हुए

सारस का जन्म बिताता हूँ ॥ वानर ने कहा—पहिले मैं तुम्हारी पूजा करता था, अब तुम मुझको प्रणाम करते हो ॥५७॥ तुम जाति से स्मरण रखते हुए मेरे पूर्व जन्म के वृत्तान्त को जानते हो तो हे सारस और सारसी ! तुम आनन्दपूर्वक रहो, तुम्हारा सदा कल्याण हो ॥ ५८ ॥ तुम्हारे वाक्य से मैं मोह रहित हो गया, मैं सर्वदा विचरूँगा ॥ प्रेत ने

वानर उवाच—मया सम्पूजितः पूर्वं नौमि त्वामधुनाप्यहम् ॥५७॥ जातिस्मरोऽसि जानासि सर्वं मत्पूर्वदैहिकम् ॥ तिष्ठ सारस सारस्या शिवमस्तु सदा तव ॥ ५८ ॥ त्वद्वाक्याद्गतमोहोऽहं विचरिष्यामि सर्वदा ॥ प्रेत उवाच—इमं रम्यं विचित्रं च पावनं परमं द्विज ॥ ५९ ॥ पक्षिवानरसंवादं श्रुतं यावन्नदीतटे ॥ तावन्ममापि बोधोऽभूत्तेन शोकः क्षयं गतः ॥ ६० ॥ इत्थं रहस्यं परमं सर्वपापप्रणाशनम् ॥ शृणोति य इदं भक्त्या तस्य ज्ञानं भविष्यति ॥६१॥

इति श्रीपद्मपुराणे उत्तरखण्डे माघमाहात्म्ये वानरजन्मकथनं नाम षड्विंशोऽध्यायः ॥२६॥

कहा—हे ब्राह्मण ! यह सुन्दर, विचित्र, परम पवित्र ॥ ५९ ॥ पक्षी और बन्दर का संवाद मैंने नदी के तट पर सुना तब इससे मुझे भी बोध हुआ और मेरे शोक का नाश हुआ ॥ ६० ॥ यह अपूर्व रहस्य सब पापों को नाश करने वाला है, जो कोई भक्तिपूर्वक इसको सुनता है उसको ज्ञान उत्पन्न होता है ॥ ६१ ॥

श्री पद्मपुराण के उत्तर खण्ड के माघमाहात्म्य में वानर के जन्म कथन नाम का छब्बीसवाँ अध्याय समाप्त हुआ ॥ २६ ॥

प्रेत ने कहा—हे द्विजश्रेष्ठ! इस समय मैं आपसे गंगाजी का जल माँगता हूँ जिसके अपूर्व माहात्म्य के विषय में मैंने बहुत सुना है ॥ १ ॥ बड़ी पीड़ा से व्याकुल मैं अपना प्रेतत्व दूर करना चाहता हूँ, इसी पर्वत पर मैंने एक बड़ा अद्भुत आश्चर्य गंगाजी के जल का ॥ २ ॥ देखा था, इसी से हे ब्राह्मण! मैं गंगाजल माँगता हूँ, पारियात्र

प्रेत उवाच—इदानीं जाह्नवीतोयमाहात्म्यं परमं मया ॥ श्रुतं यतो द्विजश्रेष्ठ त्वां याचे जाह्नवीजलम् ॥१॥ प्रेतत्वं तर्तुकामोऽहं वेदनातिप्रपीडितः ॥ अस्मिन्नेवाचले दृष्टं मयाऽऽश्चर्यं महाद्भुतम् ॥ २ ॥ गङ्गातोयस्य तावद्धि वाञ्छामि तज्जलं द्विज ॥ पारियात्रोद्भवः कोऽपि ब्राह्मणो ग्रामयाजकः ॥३॥ अयाज्ययाजनाद्विन्ध्ये सम्भूतो ब्रह्मराक्षसः ॥ अस्मत्सगस्य लोभेन स्थितोऽसौ हायनाष्टकम् ॥४॥ तस्यास्थीनि च पुत्रेण सञ्चितानि द्विजोत्तम ॥ क्षिप्तानि तानि गङ्गायां तीर्थे कनखलेऽमले ॥५॥ तत्क्षणादेव मुक्तोऽसौ राक्षसत्वाच्च दारुणात् ॥ इति गंगा-जलस्यालं महिमानं महाद्भुतम् ॥६॥ साक्षाद्दृष्टं मया तेन गाङ्गेयं प्रार्थये जलम् ॥ पुरस्ताद्य-

कुल में उत्पन्न एक गाँव में यज्ञ कराने वाला ब्राह्मण ॥ ३ ॥ अनधिकारी को यज्ञ कराने से ब्रह्मराक्षस हुआ था, हमारी संगति के लोभ से वह आठ वर्ष तक रहा ॥ ४ ॥ हे ब्राह्मण श्रेष्ठ! उसकी हड्डियों को उसके पुत्र ने एकट्ठा करके गंगाजी के कनखल तीर्थ में फेंक दिया ॥ ५ ॥ उसी क्षण वह दुखदायी राक्षसत्व से मुक्त हो गया, इसी प्रकार

गंगाजल की बड़ी अअद्भुत महिमा है ॥ ६ ॥ मैंने यह प्रत्यक्ष देखा है इसी से मैं आपसे गंगाजल की प्रार्थना करता हूँ, पहिले जो मैंने तीर्थ में (पाप) किये थे तथा तीर्थ में बड़े-बड़े दान लिये थे ॥ ७ ॥ और जप इत्यादि करके उसका प्रायश्चित्त नहीं किया था, उसीसे मुझ प्रेत को भोजन और जल दुर्लभ हो गया है ॥ ८ ॥ और इसी से मुझे

त्कृतस्तीर्थे तीर्थभूरि प्रतिग्रहः ॥७॥ न कृतस्तु प्रतीकारस्तस्य जाप्यादिलक्षणः ॥ तेन मे प्रेत-
रूपस्य दुर्लभोदक भोजनम् ॥८॥ सहस्रत्रयमब्दानां अतीतं विन्ध्यपर्वते ॥ इति ते कथितं सर्वं
हित्वा लज्जां गरीयसीम् ॥९॥ इदानीं धार्मिकश्रेष्ठ जलदानेन सत्वरम् ॥ सन्तर्पय मम प्राणान्
कण्ठमात्रावलम्बिनः ॥१०॥ दुर्लभं प्रेतभावेऽपि जीवनं प्राणिनामिह ॥ शरीरं रक्षणीयं तु
सर्वथा सर्वदा नरैः ॥११॥ न हीच्छन्ति तनुत्यागमपि कुष्ठादिरोगिणः ॥ देवद्युतिरुवाच—
इतीदं वचनं श्रुत्वा विस्मयं परमं गतः ॥१२॥ पथिकश्चिन्तयामास क्रियां प्रेतसमुद्भवाम् ॥

विन्ध्य पर्वत पर हजारों वर्ष बीत गये हैं, यह सब मैंने अपनी बड़ी लज्जा छोड़ कर आप से कहा है ॥ ९ ॥ हे धार्मिकों में श्रेष्ठ ! इस समय आप जलदान देकर कण्ठ तक आ गये हुए मेरे प्राणों को सन्तुष्ट कीजिये ॥ १० ॥ प्राणियों को प्रेत रूप में भी जीना दुर्लभ है, परन्तु मनुष्यों को सर्वदा सब प्रकार से शरीर की रक्षा करनी चाहिये ॥ ११ ॥ कुष्ठ इत्यादि रोग से ग्रस्त भी शरीर त्याग करने की इच्छा नहीं करते । देवद्युतिजी ने कहा—ऐसा उसका वचन सुन

कर वह ब्राह्मण बड़ा विस्मित हुआ ॥ १२ ॥ और वह प्रेत पर कृपा करता हुआ विचारने लगा—संसार में पाप तथा पुण्य के फल अवश्य प्रत्यक्ष देख पड़ते हैं ॥ १३ ॥ देव, दानव, मनुष्य तिरछे चलने वाले, कीड़े, मकोड़े, अनेक योनियों में जन्म लेकर नाना प्रकार के रोगों से पीड़ित होते हैं ॥ १४ ॥ बाल तथा वृद्धों का मरण, अन्धापन तथा

पापपुण्यफलं लोके प्रत्यक्षं खलु दृश्यते ॥१३॥ देवदानवमानुष्यं तिर्यक्त्वं कृमिकीटता ॥ नाना-
योनिषु जन्मानि नानाव्याधिप्रपीडनम् ॥ १४ ॥ मरणं बालवृद्धानामन्धत्वं कुब्जता तथा ॥
एताश्च रचना लोके भवन्ति कथमन्यथा ॥१५॥ ऐश्वर्यं च दरिद्रत्वं पाण्डित्यं मूर्खता तथा ॥
ते धन्याः कर्मभूमौ ये न्यायमार्गार्जितं धनम् ॥ १६ ॥ सत्पात्रेभ्यः प्रयच्छन्ति कुर्वन्त्ये-
वात्मनो हितम् ॥ भूमिरत्नहिरण्यानि गावो धान्यं गृहं गजाः ॥१७॥ रथाश्च वसनग्रामाः
सिद्धमन्नं फलं जलम् ॥ कन्यां दिव्यौषधं मन्त्रान् छत्रोपानद्वरासनम् ॥१८॥ शय्याताम्बूल-

कुबड़ापन संसार की रचना में अन्यथा कैसे हो सकता है ॥ १५ ॥ ऐश्वर्य, दरिद्रता, पाण्डित्य तथा मूर्खता भी संसार में कैसे होती है ! इस कर्मभूमि में जिन्होंने न्याय मार्ग से धन इकट्ठा किया है वे ही धन्य हैं ॥ १६ ॥ जो सत्पात्र को धन देते हैं वे ही अपना हित करते हैं; भूमि, रत्न, सुवर्ण, गाय, धान्य, घर, हाथी ॥ १७ ॥ रथ, घोड़ा, वस्त्र, गाँव पका हुआ अन्न, फल, जल, कन्या, दिव्य औषधि, मन्त्र, छाता, जूता, श्रेष्ठ आसन ॥ १८ ॥ पलंग, ताम्बूल, माला,

ताड़ के पंखे, ये सब पदार्थ तीनों लोक को जीतने की इच्छा करने वाले को दान करना चाहिये ॥ १९ ॥ दिया हुआ पदार्थ ही स्वर्ग में प्राप्त होता है, दिया हुआ ही भोगा जाता है, छत्र, चँवर, सवारी, अच्छे घोड़े ॥ २० ॥ तिल, गाय, हाथी, घोड़े, प्रेतान्न, अजिन, मणि, इस पदार्थों का प्रतिग्रह मद्य के समान होता है ॥ २१ ॥ महल, सुन्दर पलङ्ग,

माल्यानि तालवृन्तं च चामरम् ॥ सर्वमेतत्प्रदातव्यं लोकद्वयजिगीषुभिः ॥ १९ ॥ दत्तं हि प्राप्यते स्वर्गे दत्तमेवेह भुज्यते ॥ छत्रचामरयानानि वराश्ववरवारणाः ॥ २० ॥ तिलधेनुर्गजो वाजी प्रेतान्नमजिनं मणिः ॥ सुरभिः सूयमाना च घोराः सप्त प्रतिग्रहाः ॥२१॥ हर्म्याणिवरशय्याश्च गोमहिष्यो वरस्त्रियः ॥ रत्नभूषणमुक्ताश्च पुत्रा दास्यो महाकुलम् ॥२२॥ आयुरारोग्यसौभाग्यं कलाविद्यासु नैपुणम् ॥ दानस्यैव फलं सर्वं प्राप्यते भुवि मानवैः ॥ २३ ॥ तस्माद्देयं प्रयत्नेन नादत्तमुपतिष्ठते ॥ स कार्पटिकधर्मिष्ठ इमां गाथामगायत ॥ २४ ॥ इति श्रुत्वा पुनः प्रेतः प्रोवाच ह्यार्तचेतसा ॥ मन्ये सर्वज्ञकल्पोऽसि पान्थ त्वं नात्र संशयः ॥२५॥

गाय, भैंस, सुन्दर स्त्री, अन्न, आभूषण, मोती, पुत्र, दास, दासी, महाकुल ॥ २२ ॥ आयु, आरोग्य, सौभाग्य, कला, विद्या, निपुणता इत्यादि सभी फल संसार में मनुष्यों को दान से ही प्राप्त होते हैं ॥ २३ ॥ अतएव मनुष्यों को यत्नपूर्वक दान करना चाहिये क्योंकि दिया हुआ ही मिलता है, उस धर्मिष्ठ कार्पटिक ने इस गाथा को गाया ॥ २४ ॥ यह

सुन कर प्रेत गद्गद् होकर फिर से बोला, हे पथिक ! मुझको मालूम हो गया कि आप अवश्य सर्वज्ञ हैं ॥ २५ ॥ आप जीवन (का आधार) जल दीजिये जैसे मेघ चातक को देता है, इस प्राणदान में बहुत विलम्ब मत कीजिये ॥ २६ ॥ इसके उत्तर में पथिक ने न्याय पूर्ण वचन कहा ॥ कार्पटिक ने कहा—हे प्रेत ! सुनो, मेरे माता पिता भृगुक्षेत्र में बैठे

देहि मे जीवनं वारि चातकाय घनो यथा॥ यतस्मिन् प्राणदाने हि मा विलम्बं कृथा बहु ॥२६॥ ततः प्रत्याह पान्थस्तु वचनं न्यायगर्भितम्॥ कार्पटिक उवाच—भृगुक्षेत्रे शृणु प्रेत पितरौ मम तिष्ठतः ॥२७॥ तदर्थे तीर्थराजस्य मया वारि समाहृतम् ॥ तत् सितासितपानीयं मध्ये च प्रार्थितं त्वया ॥२८॥ न जाने धर्मसन्देहः किमत्र मम युज्यते ॥ बलाबलं विचार्याथ करिष्ये प्रबलं विधिम् ॥२९॥ वेदेभ्यो धर्मशास्त्रेभ्यो नाहं मन्ये तु केवलम् ॥ हयमेधादियज्ञेभ्यः सर्वेभ्यो ह्यधिकं मतम् ॥३०॥ ऋषिभ्यो देवताभ्यश्च प्राणिनां प्राणरक्षणम् ॥ इदं दत्त्वा वरं वारि

हैं ॥ २७ ॥ उन्हीं के लिये मैं तीर्थराज से जल लाया हूँ, बीच में तुमने गंगा यमुना के संगम के जल को माँगा ॥ २८ ॥ इस धर्म सन्देह में मुझे नहीं जान पड़ता कि मुझको क्या करना उचित है, बलाबल को विचार करने के लिये मैं पूरा प्रयत्न करूँगा ॥ २९ ॥ मैं केवल वेदों को, धर्मशास्त्रों को, अश्वमेध इत्यादि यज्ञों को बढ़ कर नहीं मानता ॥ ३० ॥ परन्तु ऋषियों तथा देवताओं से भी अधिक प्राणियों की प्राणरक्षा को मानता हूँ, इस प्रकार जल देकर

तथा प्रेत की रक्षा करके ॥ ३१ ॥ माता पिता के लिये फिर से जल लाऊँगा, यही धर्म देने वाली शुद्ध विधि मुझको प्रबल जान पड़ती है ॥ ३२ ॥ पण्डितों ने कहा है कि दूसरे के प्रति उपकार करने से अन्य सभा कार्य न्यून हैं, प्राचीन काल में मनुष्यों ने परोपकार में अपने प्राण तक दे दिये हैं ॥ ३३ ॥ यदि जल से परोपकार हो जाय तो फिर मैंने क्या

कृत्वा प्रेतस्य रक्षणम् ॥ ३१ ॥ पित्रर्थं पुनरादाय जलं नेष्यामि पावनम् ॥ एष मे प्रबलो भाति शुद्धधर्मप्रदो विधिः ॥३२॥ परोपकरणादन्यत्सर्वमल्पं स्मृतं बुधैः ॥ परोपकारिभार्दत्ता अपि प्राणा नृभिः पुरा ॥३३॥ आदिभः परोपकारश्चेत् किं न लब्धं मया पुनः ॥ दधीचिना पुरा गीतः श्लोकोऽत्र श्रूयते भुवि॥३४॥ सर्वधर्मभयः सारः सर्वधर्मज्ञसम्मतः॥परोपकारः कर्तव्यः प्राणैरपि धनैरपि ॥३५॥ परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि ॥ लोमश उवाच—इत्युक्त्वा प्रददौ तोयं गङ्गायमुनसम्भवम्॥३६॥प्रेताय प्राणरक्षार्थं स धर्मिष्ठो वरो द्विजः॥ प्रेतोऽपि तज्जलं

नहीं प्राप्त किया ? अर्थात् सब कुछ पा लिया, दधीचि ऋषि का प्राचीन काल में गाया हुआ यह श्लोक संसार में सुन पड़ता है ॥ ३४ ॥ सब धर्मों का सार तथा सभी धर्म के जानने वालों को यह सम्मत है कि प्राण से तथा धन से दूसरों का उपकार करना चाहिये ॥ ३५ ॥ परोपकार से उत्पन्न हुआ पुण्य सौ यज्ञों के तुल्य है। लोमशजी ने कहा—ऐसा कह कर (उस पथिक ने प्रेत को) गंगा यमुना के संगम का जल दिया ॥ ३६ ॥ उस धर्मिष्ठ श्रेष्ठ ब्राह्मण ने प्राणरक्षा

के निमित्त प्रेत को जल दिया, उसने प्रीतिपूर्वक जल को पिया और तब इसको अपने मस्तक पर मार्जन किया ॥ ३७ ॥ उसी क्षण वह प्रेत शरीर को त्याग कर दिव्य देहधारी हो गया, इस बड़े आश्चर्य को देखकर उस केरल ने कहा ॥ ३८ ॥ केरल बोला—अरे ! त्रिवेणी के जल के बिन्दुओं से यह प्रेतत्व से मुक्त हो गया, हम समझते हैं कि ब्रह्मा भी

पीत्वा अभिषिच्य शिरस्तदा ॥ ३७ ॥ विजहौ प्रेतदेहं तं दिव्यदेहोऽभवत् क्षणात् ॥ तदाश्चर्यं महद् दृष्ट्वा निजगाद स केरलः ॥ ३८ ॥ केरल उवाच—अहो विमुक्तः प्रेतत्वाद्वेणीपानीय-बिन्दुभिः ॥ ब्रह्मापि नैव शक्नोति मन्ये वक्तुमपां गुणान् ॥ ३९ ॥ गङ्गायास्तन्महादेवो धत्ते के कथमन्यथा ॥ अचिन्त्यशक्तिगङ्गाम्भस्तिलमात्रं तु यः पिबेत् ॥ ४० ॥ देवो भवेत् स सिद्धो वा गन्धर्वो वापि यः पिबेत् ॥ भवाब्धौ यानपात्राणि पयोबिन्दुकणालवाः ॥ ४१ ॥ पङ्कैर्गतिश्च पंगूनां यस्यास्तां को न सेवते ॥ न कालो न कलिः पापं दम्भोलिर्नैव नारकः ॥ ४२ ॥

इस जल के गुण को नहीं वर्णन कर सकते ॥ ३९ ॥ नहीं तो गंगाजी के जल को महादेवजी (अपने मस्तक पर) क्यों धारण करते; जो अचिन्त्य शक्ति वाला गंगाजी का जल तिल मात्र भी पीता है ॥ ४० ॥ वह देवता हो जाता है, सिद्ध अथवा गन्धर्व हो जाता है, संसार रूपी समुद्र को पार करने के लिये इस जल के बिन्दु के परमाणु के तुल्य भी अन्य कोई पदार्थ नहीं है ॥ ४१ ॥ संसार में दल में फँसे लूल्हे की तरह जब सबकी गति है तो इसकी सेवा कौन न

करे; काल, कलियुग, पाप, वज्र, नरक ॥ ४२ ॥ कोई ऐसे नहीं हैं जो एक बार गंगा में स्नान करने से जीते न जाँय; तप, दान, होम तथा यज्ञों से ॥४३॥ मनुष्यों के पाप उतने नहीं हटते जितने गंगा जल से, जिसके जल के कण को स्पर्श करने से तत्क्षण प्रेतत्व नष्ट हो गया ॥ ४४ ॥ इसके जल में शरीर डुबाने से स्वर्ग लोक प्राप्त होता है, इसमें कोई सन्देह

तं पराभवितुं शक्तो गंगां स्नातो हि यः सकृत् ॥ न तपोभिर्न दानैश्च नैव होमजपाध्वरैः ॥४३॥ सा मृजा जन्मिनां या स्यान्मन्दा किन्युद्भवाम्भसा ॥ यदम्भःकणसंघातात् प्रेतत्वं ह्यगमत् क्षणात् ॥४४॥ तज्जलाप्लुतदेहानां स्वर्लोको नात्र संशयः ॥ काये मनसि ये वाचि पापकौ सुम्भरञ्जिताः ॥४५॥ नाशं यान्ति न ते रङ्गाः तेषां गंगोदकं विना ॥ सिद्धा हि सिद्धयस्तस्य स्वर्गस्तस्य गृहाजिरम् ॥४६॥ करस्थं तस्य कैवल्यं यो गंगां सेवते सदा ॥ यदम्भः स्पर्शनात् पापान्मुच्यन्ते प्रेतराक्षसाः ॥ ४७ ॥ योऽवगाहयते गंगां याति तद्वैष्णवं पदम् ॥ दायादो यदि गंगायां कुरुते पितृतर्पणम् ॥४८॥ नरकस्था दिवं यान्ति नाकस्था ब्राह्मतां तु ते ॥ न गंगा

नहीं है; शरीर, मन तथा वाणी के पापरूपी रंग से जो रँगे हैं ॥४५॥ उनका यह रंग गंगा जल के बिना नहीं धुलाता, सिद्धियाँ सब सिद्ध हो जाती हैं, स्वर्ग घर का आँगन हो जाता है ॥ ४६ ॥ गंगाजी के सर्वदा सेवन से मुक्ति हाथ में रहती है जिसके जल के स्पर्श और पान से प्रेत रूपी राक्षस मुक्त होते हैं ॥४७॥ जो गंगास्नान करता है वह वैष्णव पद को प्राप्त

होता है; यदि दायाद (संबन्धी) लोग गंगाजी के जल से तर्पण करते हैं ॥ ४८ ॥ तो नरक में रहने वाले पितर लोग स्वर्ग में जाते हैं तथा स्वर्ग में रह कर ब्रह्मत्व को प्राप्त होते हैं, गङ्गाजी के समान दूसरी मुक्ति नहीं है, क्योंकि यह सबसे अधिक है ॥ ४९ ॥ हे पान्थ ! तुम आयुष्मान् हो धर्म से विमुख कभी मत हो ॥ ५० ॥ तुमने मुझको गङ्गाजी के

सदृशी मुक्तिर्गंगा सर्वाधिका यतः ॥४९॥ आयुष्मान् भव पान्थ त्वं मा धर्मविरतो भव ॥५०॥ त्वयाऽहं तारितः सद्यो गंगाम्बुकणदानतः ॥ लोमश उवाच—इत्युक्त्वा प्रस्थितो नाकं पिशाचस्तु स केरलः ॥५१॥ आशीर्भिरभिनन्द्याथ पान्थं धर्मधुरन्धरम् ॥ प्रेतं विमोच्य पान्थोऽपि पुनरादाय तज्जलम् ॥ ५२ ॥ गतस्तेनैव मार्गेण स्मरन् तीर्थोदकौतुकम् ॥ इत्थं प्रयाग माहात्म्यं श्रुत्वा नत्वा च तं मुनिम् ॥ ५३ ॥ प्रयाग सहसा माघे पिशाचः सत्वरं गतः ॥ स्नात्वा सितासिते सोऽपि माघे मासि द्विजोत्तमः ॥ ५४ ॥ पिशाचः क्षीणपापस्तु पैशाचीं

जल के कण से तुरत तार दिया । लोमशजी ने कहा—ऐसा कह कर उस केरल ने पिशाच को स्वर्ग में भेज दिया ॥ ५१ ॥ आशीर्वाद से उस धर्मधुरन्धर पथिक को अभिनन्दन करके प्रेत ने मोक्ष पाया और पथिक भी फिर से जल लाकर ॥ ५२ ॥ तीर्थोदक के कौतुक को स्मरण करता हुआ उसी मार्ग से चला गया, इस प्रयाग के माहात्म्य को सुन कर तथा उस मुनि को नमस्कार करके ॥ ५३ ॥ वह पिशाच एकाएक माघ मास में शीघ्र प्रयाग में गया, हे द्विजों में

उत्तम ! वह भी माघ मास में गङ्गा यमुना के सङ्गम में स्नान कर ॥ ५४ ॥ क्षीण पाप होकर पिशाच के शरीर से मुक्त हो गया, तब दिव्य शरीर का होकर वह द्रविड़ देश का राजा ॥ ५५ ॥ भक्तिपूर्वक द्वेष त्याग कर भगवान् नारायण की स्तुति करता हुआ, गन्धर्वों से स्तुति किया जाता हुआ तथा तथा स्वर्ग की स्त्रियों से पंखा झला जाता हुआ

विजहौ तनुम् ॥ दिव्यदेहस्ततो भूत्वा द्राविडो भूपतिस्तदा ॥ ५५ ॥ स्तुवन्नारायणं देवं भक्त्या द्वेषविवर्जितः ॥ गन्धर्वैः स्तूयमानस्तु नाकनारीसुवीजितः ॥५६॥ उत्तमेन विमानेन आरुह्येन्द्रपुरं ययौ ॥ इति ते कथितं सर्वं पूर्ववृत्तं सकौतुकम् ॥ ५७ ॥ इतिहासं द्विजश्रेष्ठ सद्यः पातकनाशनम् ॥ धर्ममीमांसनं पुण्यं यशस्य कीर्तिवर्धनम् ॥५८॥ ज्ञानदं मोक्षदं चव श्रुतं दुर्गतिनाशनम् ॥ अधुना तु मया सार्धमिमाः कन्याः सुतश्च ते ॥५९॥ त्वं चायान्तु प्रयागं वै सर्वे सद्गतिलिप्सवः ॥ माघस्नानं प्रकुर्मोऽत्र देवनालपि दुर्लभम् ॥ ६० ॥ तत्र

॥ ५६ ॥ उत्तम विमान पर चढ़ कर इन्द्रपुरी को गया, मैंने तुमसे यह कौतुकपूर्ण प्राचीन वृत्तान्त पूरा २ कहा ॥ ५७ ॥ हे द्विजश्रेष्ठ ! यह इतिहास पापों को तुरत नाश करता है, इससे धर्म का ज्ञान होता है, यह पुण्य, यश तथा कीर्ति को बढ़ाने वाला है ॥ ५८ ॥ यह ज्ञान तथा मोक्ष को देने वाला तथा दुर्गति को नाश करने वाला है, अब मेरे साथ ये कन्यायें ये पुत्र ॥ ५९ ॥ और तुम भी सद्गति प्राप्त करने के लिए प्रयाग चलो और वहाँ पर हम लोग ऐसा माघ

स्नान करें जो देवताओं को भी दुर्लभ है ॥ ६० ॥ वहाँ पर शाप से उत्पन्न हुए पिशाच तुरत मुक्त होंगे ॥ वसिष्ठ जी ने कहा—इस प्रकार लोमशजी के मुख कमल से अमृतमय मधुर कथा को सुन कर ॥ ६१ ॥ मानो अमृत पीकर सब

मोक्ष्यन्ति पैशाच्यं सद्यः शापसमुद्भवम् ॥ वसिष्ठ उवाच—एवं लोमशवक्त्राब्जकथामधुसुधारसम् ॥६१॥ पीत्वा प्रमुदिताः सर्वे निस्तीर्णा दुरितार्णवात् ॥ प्रस्थितास्तेन सार्धं ते काष्ठां सपदि दक्षिणाम् ॥ ६२ ॥ इति श्रीपद्मपुराणे उत्तरखण्डे माघमाहात्म्ये सप्तविंशोऽध्यायः ॥ २७ ॥

प्रसन्न हुए और पापरूपी समुद्र के पार हुए, और उन्ही के साथ उन लोगों ने दक्षिण दिशा में प्रस्थान किया ॥ ६२ ॥

श्री पद्मपुराण के माघमाहात्म्य में सत्ताइसवाँ अध्याय समाप्त हुआ ॥ २७ ॥

वसिष्ठ उवाच—दिलीप शृणु वक्ष्यामि स्नात्वाऽच्छोदसरोवरे ॥ सत्वरं व्योममार्गेण सानन्दगतयस्तु ते ॥ १ ॥ समागत्य स्थिता व्योम्नि सन्तुष्टहृदयास्तदा ॥ अथोचे लोमशस्तत्र मोदयन् सर्वमानसम् ॥२॥ पश्यन्तु श्रद्धया सर्वे तीर्थराजमिमं भुवि ॥ इयं सा मखवेदिर्वै

वसिष्ठजी ने कहा—हे दिलीप ! मैं कहता हूँ सुनो, अच्छोद सरोवर में स्नान करके लोग आनन्द पूर्वक आकाश मार्ग से चले गये ॥ १ ॥ और सन्तुष्ट होकर आकाश मार्ग से उस स्थान पर पहुँचे, तब लोमश जी सबको प्रसन्न करते हुए बोले ॥ २ ॥ संसार के इस तीर्थ राज को श्रद्धा पूर्वक सब लोग देखो, यह वही यज्ञ की वेदी है,

यह यजमान का स्थान है ॥ ३ ॥ ये तीन कुण्ड हैं जिनमें अग्नि जल रही है, यहाँ पर तृप्त होती हुई अग्नि किसको तृप्त नही करती ? ॥ ४ ॥ यहीं पर हस्तो के सूँड़ के समान स्थूल वसुधारा से तैंतीस करोड़ देवता सन्तुष्ट होकर आनन्द पूर्वक रहते हैं ॥ ५ ॥ और स्वादिष्ट पर्याप्त सोमधारा पीते हैं, यहाँ पर त्रिशूल धारी महादेवजी

यजमानस्य वेधसः ॥ ३ ॥ इमानि त्रीणि कुण्डानि दीप्तान्येवात्र वह्निभिः ॥ अत्र तृप्तिं गतो वह्निर्यः केनापिन तृप्यति ॥४॥ स्तम्बेरमकरस्थूलचण्डया वसुधारया ॥ अत्र देवास्त्रयस्त्रिंशत् तृप्ता मुमुदिरे भृशम् ॥५॥ मदिष्टयागेऽतिस्वादु पर्याप्तं सोमधारया ॥ आविर्भूतः स्वयं ह्यत्र शूलटङ्को महेश्वरः ॥ ६ ॥ अक्षयोऽयं सुरैः सेव्य आपातालजटो वटः ॥ मृकण्डसूनुना कल्पे प्रविश्य यन्मुखे स्थितम् ॥७॥ लोके जलाकुले सोऽयं योगशायी जनार्दनः ॥ सेयं भगवती शम्भोर्वल्लभा ललिता भृशम् ॥ ८ ॥ सिद्धार्थं सेव्यते सिद्धैर्भुक्तिमुक्तिफलप्रदा ॥ अपि ह्यटति गङ्गेयं

का प्रादुर्भाव हुआ था ॥ ६ ॥ देवताओं से सेवित यह अक्षयवट (बरगद) है जिसकी जड़ पाताल तक गयी है और मृकण्डु के पुत्र (मार्कण्डेयजी) जब प्रलय के समय संसार जल से डूबा रहता है, जिस भगवान के मुख में रहते हैं ॥७॥ वह जनार्दन भगवान् इसी वट वृक्ष पर योग की निद्रा लेते हैं, यही महादेव की अति प्रिय सुन्दर भगवती भागीरथी हैं ॥ ८ ॥ भुक्ति तथा मुक्ति के फल को देने वाली सिद्धि के लिये सिद्ध लोगों से सेवा की जाने वाली

यह गंगा मुक्ति प्राप्त कराने के लिए यहाँ भ्रमण करती हैं ॥ ९ ॥ यह भागीरथी स्वर्ग के निमित्त पताका है, इसका जल पीकर मनुष्य मुक्त होते हैं ॥ १० । हे मुनि ! सभी प्राणी इस नदी (गंगाजी) को यमुना से मिली हुई पाते हैं, इनका संगम बड़े पुण्य से प्राप्त होता है ॥ ११ ॥ इसमें स्नान करने से जन्म-मृत्यु रूपी दावानल से

मुक्तिमार्गे ह्यनुत्तमा ॥ ९ ॥ स्वर्गहेतोश्च या केतुः सेय भागीरथी नदी ॥ यस्या जललिहो लोका विकर्तनसलोकताम् ॥१०॥ लभन्ते प्राणिनः सर्वे सा नदी यमुना त्वियम् ॥ अनयोः पुण्यलब्धस्तु स ह्ययं सङ्गमो मुने ॥ ११ ॥ यत्र स्नाता न तप्यन्ते जन्ममृत्युदवाग्निना ॥ अविमुक्त विमुच्यन्ते तारकज्ञानजन्मना ॥१२॥ विना ज्ञान प्रयागेऽस्मिन् मुच्यन्ते सर्वजन्तवः ॥ इष्ट्वाऽत्रैव महायज्ञैः सृष्टिकामः प्रजापतिः ॥ १३ ॥ अवाप सृष्टिसामर्थ्यं ततःसृष्टिं चकारसः ॥ अत्र नारायणः सस्नौ पत्नीकामः सितासिते ॥ १४ ॥ तदव लब्धवान् लक्ष्मीं भार्यामम्रतमन्थने ॥ उषित्वाऽत्रैव षण्मासान् स्नात्वा वेण्यां जयोत्सुकः ॥१५॥ त्रिपुरं पातयामास ह्येक-

कोई नहीं तपता, परन्तु ज्ञान प्राप्त करके तर जाता है तथा मुक्ति प्राप्त करता है ॥ १२ ॥ सभी जन्तु ज्ञान के विना प्रयाग में स्नान करके मुक्त हो जाते हैं, यही देख कर ब्रह्माजी ने यहीं पर महा यज्ञ करने की इच्छा की थी ॥ १३ ॥ तथा यज्ञ करके सृष्टि रचने का सामर्थ्य प्राप्त किया था, इस गंगा यमुना के संगम में पत्नी प्राप्त करने की इच्छा से भगवान् नारायण ने स्नान किया था ॥ १४ ॥ तब उन्होंने अमृत के मन्थन में लक्ष्मी को प्राप्त किया था, यहाँ पर ठहर कर उन्होंने त्रिवेणी में तीन महीने तक स्नान किया था ॥ १५ ॥ त्रिशूलधारी महादेवजी ने

एद वाण से यहीं पर त्रिपुर दैत्य को गिराया था, प्राचीन काल में इन्द्र के शाप से उर्वशी स्वर्ग से गिरी थी ॥ १६ ॥ स्वर्ग प्राप्त करने की इच्छा से उसने यहाँ स्नान किया था, तब शीघ्र ही उसको स्वर्ग मिला था, नहुष कुल के राजा ययाति ने वंशधर पुत्र को प्राप्त किया था ॥ १७ ॥ हे द्विजश्रेष्ठ ! इस पुण्य गंगा यमुना के संगम में पुत्र प्राप्ति की इच्छा

वाणेन शूलधृक् ॥ वासवस्यतु शापेन स्वर्गभ्रष्टा पुरोर्वशी ॥ १६ ॥ स्वर्गकामा च सा सस्नौ लेभे स्वर्गं ततोऽचिरात् ॥ पुत्रं वंशधरं लेभे ययातिर्नाहुषो मुने ॥१७॥ पुत्रकामः प्रयागे च स्नात्वा पुण्ये सितासिते ॥ धनकामः पुराः शक्रः स्नात्वाऽत्रैव द्विजोत्तम ॥ १८ ॥ धनदस्य निधीन् सर्वान्नाजहार स्वमायया ॥ नारायणो नरश्चैव वर्षाणामयुतं पुरा ॥ १९ ॥ अनाहारः प्रयागेऽस्मिन् कृतवान् धर्ममुत्तमम् ॥ जैगीषव्योऽत्र संन्यासी ईशधर्मोऽपराजयः ॥२०॥ अणिमादिगुणैश्वर्यं योगर्द्धिं चाप दुर्लभाम् ॥ कश्यपोऽत्र तपस्तेपे शिवाराधनतत्परः ॥२१॥

करने वाले को स्नान करना चाहिये, यहीं पर इन्द्र ने प्राचीन काल में धन की कामना करके स्नान किया था ॥ १८ ॥ अपनी माया से उन्होंने कुबेर के सब धन को यहाँ स्नान करके प्राप्त किया था, प्राचीन काल में नारायण तथा नर ने हजारों वर्ष तक ॥ १९ ॥ यहाँ प्रयाग में निराहार हो उत्तम धर्म किया था, यहाँ पर जैगीषव्य संन्यासी महादेवजी की जैसी शक्तिवाले होकर विजय पाये थे ॥२०॥ तथा अणिमादि (बहुत छोटा या बड़ा बजना इत्यादि) योग के अति दुर्लभ ऐश्वर्य प्राप्त किये शिव की आराधना में तत्पर होकर कश्यप ऋषि ने यहीं पर तपस्या किया था ॥२१॥ इस तीर्थ में तपस्या करके

भरद्वाज (कश्यप आदि ७ ऋषियों में) सातवें हुए थे, हे ब्राह्मण ! इसी क्षेत्र में प्राचीन काल में आत्मज्ञानी॥२२॥ सनकादि ऋषियों ने योग फल-सिद्धि को प्राप्त किया था, इस गंगा और यमुना के संगम के क्षेत्र (तीर्थ) में जिन लोगों ने स्नान किया ॥ २३ ॥ वे सब पाप से रहित होकर आकाश में तारारूप व्याप्त हो गये, कामी लोग (यहाँ स्नान करने से)

अस्मिन् तीर्थे भरद्वाजः षण्णां वै सप्तमोऽभवत् ॥ अस्मिन् क्षेत्रे पुरा विप्र क्षेत्रज्ञस्याऽपरोक्षता ॥२२॥ योगस्य फलसंसिद्धिं लेभिरे सनकादयः ॥ अस्मिन् क्षेत्रे तुयैः स्नातं गंगायमुनसङ्गमे ॥२३॥ तारारूपश्च तैर्व्याप्ता द्यौरियं सकलामला ॥ विन्दन्ति कामिनः कामान् मुक्तिं यान्ति मुमुक्षवः ॥ २४ ॥ विन्दन्ति साधकाः सिद्धिं प्रयागे हि द्विजोत्तम ॥ सन्प्राप्तं मुक्तिकामास्तु कन्याश्चापि सुतश्च ते ॥ २५ ॥ मद्वाक्यादत्र मज्जन्तु सर्वे त्वं च सितासिते ॥ प्राक्कालीनाघ-विध्वंसिवेणीजलबलेन तु ॥ २६॥ लभन्तामखिलां लक्ष्मीं प्राप्ताः शापं महाफलम् ॥ एव-मार्षवचः सत्यमतीन्द्रियमलंघनम् ॥ २७ ॥ श्रुत्वा चोत्कण्ठचित्तास्ते सर्वे स्नानाय चोद्यताः ॥

काम को प्राप्त करते हैं, मोक्ष की इच्छा करने वाले मोक्ष पाते हैं ॥ २४ ॥ हे द्विजोत्तम ! प्रयाग में साधक लोग सिद्धि प्राप्त करते हैं, मुक्ति को चाहने वाले पुत्र तथा कन्या ॥ २५ ॥ हमारे कहने से तुम सब इस गङ्गा यमुना के संगम में स्नान करो, त्रिवेणी के जल के प्रभाव से तुम्हारे पहिले किये हुए सब पाप नष्ट हो जावेंगे ॥ २६ ॥ इसके महाफल से सम्पूर्ण वैभव को प्राप्त करोगे, ऋषि के ऐसे सत्य तथा उल्लंघन न करने योग्य वचन को सावधानी से ॥२७॥

सुनकर वे सब उत्कंठित चित्त से स्नान करने में लग गये और उसी क्षण प्रयाग में स्नान करने से उनकी पिशाचता नष्ट हो गई ॥ २८ ॥ शाप के दुःख से विमुक्त होकर उन्होंने अपनी शरीर प्राप्त कर लिया, वेदनिधि ने अपने पुत्र तथा दिव्य रूप वाली कन्याओं को देखकर ॥ २९ ॥ प्रसन्न चित्त होकर तथा प्रति पूर्वक लोमशजी को

प्रयागं प्राप्य दुष्प्राप्यं पशाच्यं विजहुः क्षणात् ॥ २८ ॥ विमुक्ताः शापदुःखेन तनुं स्वां स्वां च लेभिरे ॥ दृष्ट्वा वेदनिधिः पुत्रं ताः कन्या दिव्यरूपिणीः ॥ २९ ॥ तुष्टाव लोमशं प्रीत्या प्रसन्नेनान्तरात्मना ॥ त्वदनुग्रहमात्रेणोत्तीर्णः पापमहार्णवः ॥ ३० ॥ इदानीमुचितं ब्रूहि बालानामृषिसत्तम ॥ लोमश उवाच—कुमारोऽधीतवेदोऽयं समाप्तनियमो युवा ॥ ३१ ॥ अज्ञातुं सानुरागाणां गृह्णातु करपङ्कजम् ॥ ततो लोमशवाक्येन स्वपितुर्वचनात्तदा ॥ ३२ ॥ विवाहविधिना चाशु ब्रह्मचारी स धार्मिकः ॥ शुभद्रव्यश्च मन्त्रश्च ऋषिभिः कृतमङ्गलः ॥३३॥ पञ्चाना-

सन्तुष्ट किया और कहा कि आपके अनुग्रह से ही ये बड़े पाप से निर्मुक्त हुए ॥ ३० ॥ हे ऋषिश्रेष्ठ ! अब इन बालकों के योग्य धर्म को कहिये। लोमशजी ने कहा—इस युवा कुमार ने वेदों का अध्ययन समाप्त कर लिया ॥ ३१ ॥ मैं प्रीति पूर्वक कहता हूँ कि इनके करकमल को ग्रहण करे; तब लोमशजी के तथा अपने पिता के वचन से ॥ ३२ ॥ इस धार्मिक ब्रह्मचारी ने विवाह विधि से सुन्दर द्रव्य तथा मन्त्रों से तथा ऋषियों से मंगल किये जाते हुए ॥ ३३ ॥

धर्मपूर्वक पाँचों कन्याओं से पाणिग्रहण (विवाह) किया, इन कन्याओं के पूर्ण मनोरथ सफल हुए और ये सब बड़ी प्रसन्न हुई ॥ ३४ ॥ वह कुमार भी अति सन्तुष्ट हुआ, लोमशजी को नमस्कार करने पर और उनसे आज्ञा लेकर ॥ ३५ ॥ वे देवताओं से सेवित मेरु पर्वत पर चले गये, तब हे राजन् ! वेदनिधि अपने पुत्र तथा पाँचों बहुओं को

मपि कन्यानां पाणिं जग्राह धर्मतः ॥ आनन्दिन्यस्तदा सर्वाः कन्याः पूर्णमनोरथाः ॥३४॥
बभूवुः सकुमाराश्च सन्तुष्टश्च बभूव ह ॥ दत्त्वाऽनुज्ञां मुनिः सोऽथ लोमशस्तैर्नमस्कृतः ॥३५॥
जगाम स्वाश्रमं मेरुं पर्वतं सुरसेवितम् ॥ ततो वेदनिधी राजन् स्नुषाः पञ्च सुतं तथा ॥३६॥
पुरस्कृत्य मुदा युक्तो धनदस्य पुरं ययौ ॥ ३७ ॥ वञ्चकश्च पितृद्रोही गुरुदाररतस्तथा ॥
कन्याविक्रयकश्चापि विष्णुब्राह्मणद्रोहकः ॥ ३८ ॥ ते सर्वे शुद्धिमायान्ति श्रुत्वेमा विशदाः
कथाः ॥ मोक्षदं कामदं काम्यं प्रकाश्यं नेतरे जने ॥३९॥ गोपनीयं प्रयत्नेन येषां श्रद्धा न विद्य-
ते ॥ न तेषां कथनीयं व सत्यं सत्यं हि सूतज ॥४०॥ स विष्णुर्देवता विप्राः स ब्रह्मा स च

॥ ३६ ॥ लेकर प्रसन्न चित्त होकर कुबेर के नगर को गये ॥ ३७ ॥ वंचक, पिता का द्रोही, गुरु की पत्नी में रत, कन्या की बिक्री करने वाला, विष्णु तथा ब्राह्मण से द्रोह करने वाला ॥ ३८ ॥ ये लोग भी इस पवित्र कथा को सुनकर शुद्धि प्राप्त करते हैं, यह तीर्थ मोक्ष देने वाला है, मनचाहा फल देने वाला है, और गोपनीय है ॥ ३९ ॥ जिनको श्रद्धा न हो उनसे यह कथा गुप्त रखनी चाहिए, उनसे हे सूतजी के पुत्र ! यह कथा कभी न कहनी चाहिए ॥ ४० ॥

जो इसको पढ़ता है या सुनता है वही ब्राह्मण, विष्णु, देवता, ब्रह्मा और शंकर है, वह विष्णु का सायुज्य प्राप्त करता है ॥ ४१ ॥ यह पुण्य है, पाप को हरने वाली है, धन्य है, बुरे स्वप्न को नाश करने वाली है, यह विष्णु का माहात्म्य पढ़ना तथा सुनना सभी है ॥ ४२ ॥ इस माहात्म्य को सुन कर इसके पढ़ने वाले का पूजन करे इसको

शंकरः ॥ यः पठेत् शृणुयाद्वापि स गच्छेद्विष्णुसाम्यताम् ॥४१॥ एतत् पुण्यं सपहरं धन्यं दुःस्वप्ननाशनम् ॥ पठतां शृण्वतां चैव विष्णोर्माहात्म्यमत्तमम् ॥ ४२ ॥ माहात्म्यमेतदाकर्ण्य पूजयेच्चास्य पाठकम् ॥ गोभूहिरण्यवस्त्रैश्च विष्णुतुल्यो यतो हि सः ॥ ४३ ॥ वाचके पूजिते यस्माद्विष्णुर्भवति पूजितः ॥ तस्मात्तं पूजयेन्नित्यं यदीच्छेत् सफलं श्रुतम् ॥४४॥ यः पठेद्दिव्य-माहात्म्यं श्रुत्वा चैवावधारयेत् ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥४५॥ परमिम-मितिहासं पावनं तीर्थवृत्तं वृजिनविलयहेतुं यः शृणोतीह नित्यम् ॥ स भवति खलु पूर्णः सर्वकामैरभीष्टैर्जयति च सुरलोकं दुर्लभं धर्महीनैः ॥ ४६ ॥ कथितं ब्रह्मणा पर्व वसिष्ठाय

गाय, भूमि, सुवर्ण तथा वस्त्र दे क्योंकि यह विष्णु तुल्य है ॥ ४३ ॥ इस कथा के वाचक की पूजा करने से विष्णु भगवान् प्रसन्न होते हैं, अतएव यदि सुनने का फल प्राप्त करना हो तो इनका नित्य पजन कर ॥ ४४ ॥ जो इस दिव्य माहात्म्य को सुनता और याद करता है वह सब पापों से छूट कर विष्णु लोक को जाता है ॥ ४५ ॥ पाप को नाश करने के निमित्त जो इस पुण्य तीर्थ के इस दिव्य इतिहास को नित्य सुनता है उसकी सब कामनाएँ पूर्ण होती हैं

और वह सुरलोक का विजय करता है जो धर्महीनों के लिये दुर्लभ है ॥ ४६ ॥ इसको ब्रह्माजी ने पहिले वसिष्ठ मुनि से कहा था, उसको दत्तात्रेयजी ने कहा, तथा वसिष्ठजी ने राजा दिलीप से कहा ॥ ४७ ॥ सब पापों को नाश करने वाला यह पुण्य माघमाहात्म्य मैंने कार्तवीर्य को सुनाया ॥ ४८ ॥ जिसके घर में लिखा हुआ यह माहात्म्य सर्वदा

महात्मने ॥ दिलीपाय वसिष्ठेन दत्तात्रेयेण भाषितम् ॥ ४७ ॥ कार्तवीर्याय चाख्यातं तत्पुण्यं श्रावितं मया ॥ सुपुण्यं माघमाहात्म्यं सर्वपापप्रणाशनम् ॥ ४८ ॥ यस्येदं लिखितं गेहे तिष्ठते पूजितं सदा ॥ तस्य नारायणो देवः सदा तिष्ठति पूजितः ॥ ४९ ॥ यश्चवं शृणुयान्नित्यं नैरन्तर्येण मानवः ॥ तेन मन्त्राः पुराणानि सर्वे वेदाः ससंग्रहाः ॥ ५० ॥ जप्ताः स्युः पुष्करे तीर्थे प्रयागे सिन्धुसागरे ॥ देवागारे कुरुक्षेत्रे वाराणस्यां विशेषतः ॥५१॥ पुष्करे ग्रहणे चैव यत्फलं जपतो भवेत् ॥ तत्फलं द्विगुणं तस्य संयतात्मा शृणोति यः ॥५२॥ श्रुत्वा तु पूजयेत्

पूजा किया जाता है उसके घर में सर्वदा भगवान् नारायण पूजित रहते हैं ॥ ४९ ॥ जो मनुष्य निरन्तर नित्य इस माहात्म्य को सुनते हैं वे (मानो) सब वेद, मन्त्र, पुराण को संग्रह किए हुए हैं ॥ ५० ॥ पुष्कर तीर्थ में, प्रयाग में, गङ्गा सागर में, देवालय में, कुरुक्षेत्र में तथा विशेष कर काशी में इसका पाठ अवश्य करना चाहिये ॥ ५१ ॥ पुष्कर तीर्थ में ग्रहण में इसका पाठ करने से दूना फल होता है तथा जो मन लगाकर इसको सुनता है ॥ ५२ ॥ और

पुराण बाँचने वाले ब्राह्मण का पूजन करता है तथा हे सूतजी के पुत्र ! गाय, भूमि, वस्त्र, आभूषण इत्यादि अमूल्य पदार्थ देता है ॥ ५३ ॥ ऐसा करने से जो पुण्य होता है उसको मैं कह नहीं सकता—ऐसा मनुष्य संसार में सुखी

सूत पुराणज्ञं द्विजोत्तमम् ॥ गोभूमिवस्त्रभूषाद्यैर्बहुलाभेन सूतज ॥ ५३ ॥ एवं कृते तु यत्पुण्यं न तच्छक्यं मयेरितम् ॥ इहैव स सुखी भूत्वा निरातङ्को गतज्वरः ॥ ५४ ॥ ततोऽवसाने सूतेन्द्र प्राप्नुयाद्वैष्णवं पदम् ॥ ५५ ॥

इति श्रीपद्मपुराणे उत्तरखण्डे मा० मा० वसिष्ठदिलीपसं० तदन्तर्गतदत्तात्रयकार्तवीर्यार्जुन सं० तदन्तर्गतलोमशवेदनिधिसंवादे तदन्तर्गतव्याससूतसंवादे अष्टाविंशतितमोऽध्यायः ॥ २८ ॥

होता है ॥ ५४ ॥ उसको किसी प्रकार की पीड़ा नहीं होती और वह मरने पर वैष्णव पद को प्राप्त होता है ॥ ५५ ॥

श्री पद्मपुराण के उत्तरखण्ड में माघमाहात्म्य के वसिष्ठ और दिलीप संवाद में अट्ठाइसवाँ अध्याय समाप्त हुआ ॥ २८ ॥

॥ समाप्तम् ॥

अथ माघमासव्रतोद्यापनप्रयोगः ।

★

आदौ मध्ये अन्ते वा पूर्णिमायां कार्यम् । तिथ्यादि संकीर्त्य ममात्मनः सकलपापक्षयपूर्वकैहिकामुष्मिकविविधसुखप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रतिवर्षं मासपर्यन्तं आचरितस्य आचीर्यमाणस्य च प्रातःस्नान श्रीलक्ष्मीसहितमाधवपूजनकथा श्रवणादिरूपव्रतस्य साङ्गतासिद्ध्यर्थं माघमासव्रतोद्यापनाख्यं कर्म करिष्ये । इति सङ्कल्प्य गणपतिपूजनादिनान्दी श्राद्धान्तं कृत्वा आचार्यादीन् वृणुयात् । वृताचार्यः सषपान् विकीर्य पञ्चगव्येन प्रोक्ष्य सर्वतोभद्र ब्रह्मादिदेवतास्थापनं पूजनं च विधाय तत्र कलशं संस्थाप्य तस्मिन् कलशे पूर्णपात्रोपरि अष्टदले हैमं लक्ष्मीयुतं माधवं [कार्तिकमासे तु राधया युतं दामोदरं वशाखे मधुसूदनं] इदं विष्णु—' इति मन्त्रेण प्रतिष्ठाप्य पुरतो

राजतं गरुडं च संस्थाप्य परितो ।

आह्वान करणाक — , कथाश्रवणादिना रात्रौ जागरण कुर्यात् । प्रातःकाले नित्यकर्म समाप्य कुण्डे वा स्थण्डिले अग्निं प्रतिष्ठाप्य ग्रहान् सम्पूज्य कुशकण्डिकां कृत्वा ग्रहहोमं कुर्यात् । लक्ष्म्या युतं माधवं साज्ययवमिश्रिततिलाश्वत्थसमिद्घृतपञ्चखाद्यद्रव्यचतुष्टयेनाष्टोत्तरशताहुतिभिः परिवारदेवताः ब्रह्मादिदेवताश्च दश दशाहुतिभिर्हुत्वा स्विष्टकृदादिप्रणीताविमोकान्तं कृत्वा आचार्याय सोपस्करां शय्यां गां पीठ च दत्त्वा आचार्यादिभ्यो दक्षिणां दद्यात् । पीठदानमन्त्रः—श्रीमाधव सलक्ष्मीक सुप्रतीक जनार्दन । त्व मां मोचय पापाद्वै तव मूर्त्तिप्रदानतः॥१॥ ततः कृतस्य माघमासव्रतोद्यापनस्य साद्गुण्यार्थं लक्ष्मीसहितमाधवदेवताप्रीत्यर्थं इमान् त्रिंशत्संख्याकान् सपक्वान्नान् घटान् दक्षिणासहितान् नानागोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे । ततः त्रिंशत्संख्याकान् सपत्नीकान् ब्राह्मणान् पक्वान्नादिना साभ्योज्य स्वय कुटुम्बैः सह भुञ्जीत । इति व्याकरणाचार्य 'विद्यारत्न' पं० माधवप्रसादव्यासेन संगृहीतो माघादिमासव्रतोद्यापनप्रयोगः समाप्तः ॥

मुद्रक—सूरजप्रसाद गुप्त, ज्वाला प्रिंटिंग वर्क्स, त्रिलोचन घाट, वाराणसी ।